वचनानि भवंति तद्यथा शुक्लं वस्त्रं शुक्ला शाटी शुक्लः कंबलः शुक्लौ कंबलौ शुक्लाः कंबला इति यदसौ द्रव्यं श्रितो भवति गुणः तस्य य
ल्लिंगं वचनं च तद्गुणस्यापि ॥ ॥ ॥

णाद्यपेक्षया स्त्रीशब्दात् प्रत्ययः क्रियते तत इतरेतराश्रयदोषापत्तिः प्रत्ययोत्पत्तौ परस्परापेक्षणात् इदानीं तृतीयं पक्षमाश्रित्याह सिद्धं त्विति स्त्रीत्वयुक्ते
र्थे गौणीकृतसंख्याने वर्त्तमानात् स्वार्थे टाबादय इत्यर्थः ॥ ॥श्री ॥ ॥ ॥ ॥

=स्त्र्यर्थ शब्दे कीपि सति ब्राह्मण्यादिपदप्रत्ययः सति च प्रत्यये स्त्रीब्राह्मणी इति दोषः॥२

एवमिहापीति यद्यपि गुणमात्रे प्रत्ययः क्रियते तथापि गुणगुणिनोरभेदविवक्षायां स्वाभाविकत्वाद्गुणप्रधानभावव्यवस्थायाः कुमारीशब्देन द्रव्यस्यैवाभिधानात्त
द्गतसंख्यानिमित्ता वचनोत्पत्तिर्द्रव्यवाचिना च नित्यं सामानाधिकरण्यमिति भावः। तदुक्तं हरिणा सोपाधित्वभिसंबंधादाश्रयं प्रतिपद्यते स्त्रीत्वस्य भावप्रसिद्धौ वा गुणभा
वविपर्यय इति भावस्येति स्त्रीत्वस्य स्त्रीत्वेन योग इत्यर्थः इषिमिति इषितुमिच्छतीत्यत्रेत्यर्थः निमंत्रिस्त्वेति निमन्त्र्येतत इत्यत्र निमन्त्रणे लिङ्। धात्वित्यर्थः एकस्येति एषितु
मित्यस्यैषेरित्यर्थः। बाह्यमिति भोजनादिकमित्यर्थः सर्वकाल इति तुमुन्नित्यर्थः स हि समानकर्तृकेषु तुमुन्निति कालमात्रे विधीयते अपरस्येति इच्छतीत्यस्य आ

=कर्मनिर्देशः॥२

एवमिहापि यद्द्रव्यं श्रितं भवति स्त्रीत्वं गुणः तस्य यल्लिङ्गं वचनं च तत्स्त्रीत्वस्यापि भविष्यति यदप्युच्यते अनेकप्रत्ययानुपपत्तिरिति भावस्य
भावयुक्तत्वाद्भावो भावेन युज्यते तद्यथा इषिरिषिणा निमंत्रिर्निमंत्रिणा विषम उपन्यासः युक्तं तत्रान्यत्वं साधनभेदात्कालभेदाच्च उ
क्तं तत्रैकस्य बाह्यं साधनं सर्वकालश्च प्रत्ययः अपरस्याभ्यन्तरं साधनं वर्तमानकालश्च प्रत्ययः इति इह पुनरेकं स्त्रीत्वं अथैकमप्युपलभ्यते
१ किं चातः यद्येकमुपलभ्यते द्वितीयमप्युपलभ्यतां॥ ॥ ॥

भ्यन्तरमिति इषिरेव कर्मेत्यर्थः स चैषिषतीत्यत्र प्रकृत्यर्थत्वादाभ्यन्तरम् इह पुनरिति भेदहेत्वभावादेकमेव स्त्रीत्वं इच्छायास्त्वभिन्नरूपाया अपि कालसाधनभेदात्भ
वतु भेदग्रहणमित्यर्थः इतरदिह पुनरेकमिति ब्रुवता स्त्रीत्वमनेन प्रतिपन्नं भेदस्तु प्रसाध इति मत्वाह अथैकमपीति यद्येकमुपलभ्यत इति एवं द्व्यादिष्वसद्विभ्रमगत
स्माद्यद्युपलभ्यते लिंगं अविचारितरमणीयेन च तेन प्रसिद्धो व्यवहारः तदा स्त्रीत्वस्याद्वैद्वितीयस्याप्युपलम्भोस्त्विति भावः॥ ॥ ॥

=भेदसाधनाय यद्येकमित्यादिभाष्यं न चात्र एवमादिष्विति॥२=

=लिंगस्यानुमानगम्यत्वमुपपादयति॰सुखेति॰ तलादिलाभः॥सुखाद्यात्मकसत्वादिपरिणामरूपबंधस्थूलपरिणामैः सत्वादीनामिव सत्वादिस्वरूपपरिणामस्याविर्भावादिलक्षणलिंगस्याप्यनुमेयत्वं॰ गुणानां प्रकृतिरूपविर्भावादिलिंगं तत्पदवाच्यं॰ एवंच प्रवृत्तेरपि गुणपरि=
=णामत्वात्तत्रापि गुणाविर्भावसत्वाल्लिंगयोगइत्यर्थः॥ गुणद्रव्यति॰ समाधानांतरमनेनोच्यत इत्यर्थः॥ इदंतादति॰ तद्गुणसमूहोद्रव्यमिति लक्षणमित्यर्थः॥ इदंचैतच्छास्त्रोपयोगि द्रव्यलक्षणमिति बोध्यं॰ =२=

अथैकमिति सुखदुःखमोहान्वयात्सर्वव्यक्तीनां तत्परिणामएवेदं विश्वं गुणानांच प्रवृत्तिर्लिंगं तत्र प्रवृत्तेरपि प्रवृत्तिसद्भावाल्लिंगयोगोस्तीत्यर्थः। कस्तावदिति आश्रयेनिर्ज्ञाते सुखदुःखमाधिरिति भावः। गुणसमुदाय इति रूपादिसंनिवेशमात्रमित्यर्थः गोत्वेति भावे तल् अयमतमिति इदंतन्न इति सर्वे नामप्रत्ययमर्थो योग्यं वस्तु द्रव्यमित्यर्थः। ननु स्त्रीत्वस्यापि द्रव्यरूपत्वात् परेण स्त्रीत्वेना विरुद्धो योगः षित्करणसामर्थ्यादिति एक

अथैकमप्यनुमानगम्यं द्वितीयमप्यनुमानाद्गम्यतां कस्तावद्बहवोनेकं गुणंन्याय्यं मन्यन्ते स्त्रीत्वंनाम द्रव्यस्य द्रव्येच भवतः कः संप्र =किमात्मकं द्रव्यं भवान्मन्यत इत्यर्थः॥१=
त्ययः यदितावद्गुणसमुदायोद्रव्यं कागतिर्यएते भावाः कृदभिहिता स्तद्धिताभिहिताश्च चिकीर्षागोत्वेति अयमतमेतत् कृदभिहि =अत्रगुणसमुदायाभावात्स्त्रीत्वंनस्यात्॰२=
तोभावोद्रव्यवद्भवति स्त्रीत्वमपिस्त्रीत्वेनाभिहितं द्रव्यवद्भविष्यति किंचतावद्दोषःस्यात् दृष्टस्यहि दोषस्य सुसुखः परिहारः =लिंगस्यालिंगांतराभिधानेसमाधिद्वयमनु=
गार्ग्यायणी कारीषगंध्या कालितरेति इहतावद्गार्ग्यायणीति। षित्करणसामर्थ्यान्ङीष्भविष्यति कारीषगंध्येतिवच =कातद्धंगी कारेपिअनेकमत्ययानुपप=
नाच्चाब्भविष्यति कालितरेति नयावत्कालीना वत्कालितराकिंतर्हिप्रक्षाकालीकालितरा यत्तच्छब्दरूपं प्रकर्षेवर्त्तते तस्या =नौसमाधानमाह॰कन्येमादि॰=३=
नुत्तं स्त्रीत्वमितिकृत्वाटाप्भविष्यति यदप्युच्यते इहच स्त्रीइति ईकारोनप्राप्नोतीति निपातनादेतत्सिद्धंकिंनिर्वर्तनं स्त्रिया
९मवंतिकुंतिकुरुभ्यश्चेति॥ ॥ ॥

मपिस्त्रीत्वंप्रत्ययद्वयेनाभिधीयतइत्यर्थः वचनादिति यइः स्त्राविसस्मात्तथाहिअत्र सामान्यग्रहणायतदविघातायच प्यङोनुबंधद्वयं कृतमि
तिभावः यावत्कालीति अन्योन्यप्रकर्षयुक्तोर्थोन्यश्चाप्रकर्षयुक्तः अवस्थाभेदाद्वा चनिकणादभेदाच्चैकएवार्थोभिधीयत इति भावः॥ ॥

=नन्विदंन्यदि॰ बाधकाशमत आह॰ तथापीति॰२=नन्वेवमपि ओहिनिकेपेनां तस्यापि केकनिरासस्यादत आह॰ वाचनिकेति॰ शङ्कस्यापि

स्त्रीविषय इति । ये नित्यमेव स्त्रियां वर्त्तन्ते खट्वामालादयस्तेषामकारान्तप्रकृतित्वमवधारयितुं न शक्यते अकारान्तस्य प्रयोगाभावात् । अनेकलिङ्गेषु तु कुक्कुटादिषु शक्यते ऽका-
रान्तत्वं निश्चेतुमिति भावः । सर्वेषामिति । शाकटायनदर्शने सर्वेषां शब्दानां व्युत्पाद्यत्वात् शास्त्रद्वारेणाकारान्तत्वानि स्त्रीप्रत्यय इत्यर्थः । पञ्चभिरिति । तद्धितार्थे द्विगुः । अर्हादिठक्
तस्याध्यर्द्धेत्यादिना लुक् । लुक्तद्धितलुकीति स्त्रीप्रत्ययस्य लुकि कृते प्रयोगस्याकारान्तता दृश्यत एवेत्यर्थः । अजाद्यतः । शूद्रा चेति । जातिलक्षणो ङीष् अनेन टापा बाध्यते

स्त्रीविषये ऽप्यापो ऽप्रसिद्धिरकारान्तादर्शनात् । स्त्रीविषये ऽप्यापो ऽप्रसिद्धिः खट्वामाला । किं कारणं । अकारान्तादर्शनात् । न ह्यकारान्तता दृश्यते । न
तु चेयं दृश्यते । अतिखट्वः अतिमाल इति । नैषा अकारान्तता । आप एव तद्ध्रस्वत्वं । सर्वेषां तु स्वरवर्णानुपूर्वीज्ञानार्थ उपदेशः । सर्वेषामेव तु प्राति-
पदिकानां स्वरवर्णानुपूर्वीज्ञानार्थ उपदेशः कर्त्तव्यः । शशः षष इति मा भूत् । पलाशः पलाष इति मा भूत् । मञ्चकः मञ्जक इति मा भूत् । तस्मात्सि-
द्धं । तस्मात्सिद्धमेतद्भवति । अपि चेयमकारान्तता दृश्यते । पञ्चभिः खट्वाभिः क्रीतः पटः पञ्चखट्वः दशखट्वः ॥ अजाद्यतः ॥ शूद्रा चामहत्पूर्वा जातिः ॥ शू-
॰द्रा चामहत्पूर्वेति वक्तव्यं । शूद्रा अमहत्पूर्वेति किमर्थं । महाशूद्री ॥ ॥

ननु पुंयोगलक्षणः । गौणमुख्ययोर्मुख्ये संप्रत्यय इति न्यायान्मुख्यार्थवृत्तेरिह शूद्रशब्दस्य ग्रहणात्तेन शूद्रस्य भार्या शूद्री सेत्येवं भवति । अमहत्पूर्वग्रहणं तत्र महच्छब्दस्यानुक-
रणशब्दत्वाल्लौकिकार्थाभिधायित्वाभावात्तदभावः । अमहत्पूर्वेति किमर्थमिति । अन्तरङ्गत्वात्पूर्वं टापि कृते पश्चात्सन्ने समासेन भाव्यं महती शूद्रा महाशूद्रेति । तत एव निर्देशात्त-
दन्ताट्टापः प्रतिषेधो नार्थक इति प्रश्नः । महाशूद्रीति । महाशूद्रशब्दः समुदाय एवाभीरजातिवचनो न त्वत्रावयवार्थोऽस्ति । यथा गौरखर इति । तत्र समुदायस्यानुसारेणावयवा-
र्थस्य स्त्रीत्वाभावान्नहि विवक्षितैव समासः क्रियते तत्र टापि प्रतिषिद्धे जातिलक्षणो ङीषेव भवति ॥ ॥ ॥

जातिरिति महाशूद्रशब्दः समुदायो यदा जातिवाची तदा टापः प्रतिषेधो यदा तु महत्त्वविशिष्टशूद्रप्रतिपिपादयिषिता तदा महाशूद्री सैव भवति असति तु जाति ग्रहणे अमहत्पूर्वेति प्रतिषेधसामर्थ्यादन्तरङ्गोऽपि टाब् बाध्येत ततश्च ङीप्यपि प्रसज्येत अतिभवतीति भवन्तमतिक्रान्ता महान्तमतिक्रान्तेति प्रादिसमासः ततउ गितश्चेत्यनेनोगिदन्ताद् ङीप् सिद्धो भवति गौरादिषु बृहन्महतोश्च पाठो न पठितव्यो तथा च शतुरनुम इत्यत्र नद्यजाद्युदात्तत्वे बृहन्महतोरुपसंख्यानमित्युक्तं अन्यथा ङीष एवोदात्तत्वेन सिद्धत्वात्। किं ङीप उदात्तविधानेन विभक्त्युदात्तार्थं तद्वचनमिति चेत्तर्हि गौरादिषु पाठे न प्रयोजनं अनुपसर्जनाधिकाराच्चातिमहती स्त्रीत्यत्र गौरादिङीषभावादुगिल्लक्षणो ङीप् कर्त्तव्यस्तस्य चोदात्तत्वमुपसंख्यानेन कर्त्तव्यं जातिरिति वक्ष्यामीति अन्यथा महत्

=प्रत्ययविधौ प्रतिषेधोपलक्षणमेतत्ः २=

जातिः जातिरिति चेदुक्तं यदि हि महती शूद्रा महाशूद्रा सा हि भवति शूद्रशब्दो जात्यादिषु पठ्यते तत्र कः प्रसङ्गो यन्महत्पूर्वात्स्यात् नैव प्राप्नोति नार्थः प्रतिषेधेन तदन्तविधिना प्राप्नोति ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते एवं तर्हि ज्ञापयत्याचार्यः भवतीह तदन्तविधिरिति किमेतस्य ज्ञापने प्रयोजनं भवती अतिभवती महती अतिमहती अत्र तदन्तविधिः सिद्धो भवति जातिरिति चेद्वक्ष्यामीति यद्येतज्ज्ञाप्यते पञ्चाजी दशाजी अत्रापि प्राप्नोति नैष दोषः अजादिभिः स्त्रियं विशेषयिष्यामः अजादीनां या स्त्रीति ॥ ०॥

=तदन्तविधौ दिसति अमहत्पूर्वेत्यस्य= =करणेनादिशेषणं जातिरिति चेदुक्त= =कान्तिकत्वावः २=

वैसमति प्रतिषेधे महाशूद्री महाशूद्राशब्दयोर्विषयविभागेन कथं साधुत्वं प्रतीयेतेति भावः पञ्चाजीति पञ्चानामजानां समाहार इति द्विगुस्ततो द्विगोरिति ङीप् प्राप्नोति टापा बाध्यमानत्वात् अजादीनामिति अजाद्यत इति षष्ठी तेनाजादिप्रातिपदिकाभिधेयसमवेतस्त्रीत्वमिह गृह्यते। पञ्चाजी त्वत्र तु समासाभिधेयसमाहारगतं स्त्रीत्वं न त्वजाशब्दार्थगतमिति टापोऽप्रसङ्गः प्रसासस्य च स्त्रीत्वविशेषणे पञ्चीणानामप्यजादीनामेव प्रकृतिलिङ्गविज्ञानते। सामर्थ्योद्धा। एवं तु सत्यमहत्पूर्वेति न प्रतिषेधो वक्तव्यः न हि महाशूद्रीत्यत्र शूद्रार्थगतं स्त्रीत्वमिति टापः प्रसङ्गाभावः॥ ॥ ॥ ॥

=नन्वेवं टापृकृत्स्नादितिन्यायेनेत्यत आह प्रत्याससेति सामर्थ्यादेति अजाद्यन्तप्रातिपदिकार्थगतस्त्रीत्वप्रतिपादनं तत् पुंसत्वेनैव प्रसज्येत एवं तेन कर्तुमितिभावः ॥=२= नप्रतिषेधो वक्तव्य इति तदन्तविधौ तु टापकान्तरत्वमुत्सर्गत्वमितिभावः॥१=

उगितश्च कथमिति प्रातिपदिकादिति वर्त्तते। तत्र विशेषणाविशेष्यभावे कामचारः यदि प्रातिपदिकेनोगिद्विशेष्यते तदोगितः प्राधान्यात्तेन तदन्तविधिर्नास्ति
। न च प्रातिपदिकान्तमुगित्त्वं भवतीति प्रातिपदिका उगित इति प्रसङ्गसंभवः यदा तूगिता प्रातिपदिकं विशेष्यते तदा तदन्तविधौ सत्युगिदन्तात्प्रातिपदिकादि
त्येष पक्षो भवति। पक्षद्वयेऽप्यत्रापि रितिमत्वा प्रश्नः भवतीति सर्वादिषु भवतु शतुरुगित्त्वाद्यतेः महच्छब्दोऽपि शतृवद्भावादुगित्त्वव्यपदेशः तदन्त

कादि

उगितश्च कथमिदं विज्ञायते उगितः प्रातिपदिकादिति आहोस्विदुगिदन्तात्प्रातिपदिकादिति। किं चातः यदि विज्ञायते उगितः प्रा
तिपदिकादिति सिद्धं भवतीमहतीति अतिभवती अतिमहतीति न सिध्यति तदन्तविधिर्न भविष्यति। ग्रहणवता प्रातिपदिकेन तदन्तवि
धिः प्रतिषिध्यते अथ विज्ञायते उगिदन्तात्प्रातिपदि[illegible]ति सिद्धं अतिभवती। भवतीमहतीति न सिध्यति। व्यपदेशिवद्भावोऽप्रा
तिपदिकेन उभयथा च निर्गोमती निर्यवमतीति न सिध्यति किं कारणं प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणं भवतीति यथे
च्छसि तथास्तु अस्तु तावदुगितः प्रातिपदिकादिति कथं भवती अतिमहतीति॥ ॥ ॥
त

× अतिमहतीति·२

=तथा च ग्रहणे प्रातिपदिक[illegible]स्वरूपेणोच्चारणाभावेऽपि न दोषः।१=

विधिर्नेति उगिता प्रातिपदिकस्य विशेषणादिति भावः ग्रहणवतेति ग्रहणमुपादानमात्रं न तु प्रातिपदिकस्य स्वरूपेणोच्चारणं अथेति अमहन्नूर्वेति[illegible]षेधेने
हस्य करणे तदन्तविधेर्लोपेऽपि न त्वादिति भावः निर्गोमतीति आद्येपक्षे गोमती सत्त्वापि न सिद्धाति उगित्त्वं मतुपो गोमानित्यादौ नुमर्थस्यान्तं द्वितीयेनु गोमतीति सिद्ध्यति म
तुप उगित्त्वात्तदन्तत्वाच्च गोमत्शब्दस्य गोमतो निष्क्रान्ते इति समासेन तु कृते निरादेः समुदायान्मतुपो विधानाभावात् ङीप्रसङ्ग इत्यादिरसमर्थः॥ ॥ ॥

तदंतविधिनेति ननु प्रातिपदिके नोगितो विशेषणाद्विशेष्येण कथं तदंतविधिः एवं तर्हि तंत्रेणायोगद्वयमुच्चार्यते तत्र कस्मिन्योगे प्रातिपदिके नोगिद्विशेष्यते द्वितीये तूगिता प्रातिपदिकमिति दोषाभावः नैतदस्ति उगिद्ग्रहणस्य तदुगितिशब्दरूपमात्रं अन्यपदार्थं आश्रीयते ननु प्रातिपदिकमेवेत्यर्थः व्यपदेशिवद्भावेनेति प्रयोगभेदेन भवान्भवतीतिवच्छद्रूपं नानारूपं प्रयुज्यते तत्स्यायं भवच्छब्दोऽन्त इति कल्पनयेत्यर्थः एतेन येन विधिस्तदंतस्येत्यत्र स्वं रूपमिति नि

तदंतविधिना भविष्यति ननु चोक्तं ग्रहणवता प्रातिपदिकेन तदंतविधिः प्रतिषिध्यत इति नैतत्प्रातिपदिकग्रहणं प्रातिपदिका प्रातिपदिकयोरेतद्ग्रहणं अथवा पुनरस्तु उगिदंतात्प्रातिपदिकादिति कथं भवतीमहतीति व्यपदेशिवद्भावेन भविष्यति ननु चोक्तं व्यपदेशिवद्भावो प्रातिपदिकेनेति नैतत्प्रातिपदिकग्रहणं प्रातिपदिकाप्रातिपदिकयोरेतद्ग्रहणं यदप्युच्यते उभयथा निर्गोमती निर्यवमतीति न सिध्यति किं कारणं प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीति नैतत्प्रत्ययग्रहणं प्रत्ययाप्रत्यययोरेतद्ग्रहणं कथं वर्णोप्युगित् प्रत्ययोप्युगित् प्रातिपदिकमप्युगित् धातोरुगितः प्रतिषेधः धातोरुगितः प्रतिषेधो वक्तव्यः उखास्रद्ब्राह्मणी पर्णध्वद्ब्राह्मणी अंचतेश्चोपसंख्यानं अंचतेश्चोपसंख्यानं कर्तव्यं प्राचीप्रतीची ॥ " " ॥

वच्चमिति दर्शितं भवति तेन गोक्षीरमित्यादौ गोस्त्रियोरिति ह्रस्वो न भवति वर्णोप्युगिदिति अर्वणस्त्रसावनञ इत्यत्र वेच्छ ह्रस्पत आदेशस्तत्रार्वतीति ङीर्भवति अस्य पर्यायो वनृशब्दः नत्वंगस्य तपाद् आदेशो विधीयते तत्र ऋन्नेभ्य इति ङीपि कृते आदेशे न भवति तत्त्वं एवं तर्हि संभवमात्रे गोत उक्तमित्यदोषः॥

=अर्वन्नृशब्दस्य स्त्रियां हृतिलं दर्शयति अस्य पर्याय इति ९=अदोष इति वस्तुतस्तु कोऽपि सादावांगोक्त्रिमांचेतित्वस्यावोपधाङीवृत्तेः प्रागेवं आदेशोपि ङीबुल्ने: प्रागेवेतिभाष्याशयः=९=

=अकारस्य उच्चारणार्थ इतिभावः।४=आदिनं चेति। ङीपि कृते आदिना भित्यर्थः। नलोपस्तु प्राप्य एवेतिभावः।४=

उगित्सं चतिग्रहणादिति' उगिदचामिति सन्नोगिद्ग्रहणादंचतेरपिग्रहणोसिद्धे चतिग्रहणं नियमार्थं इह यतः शास्त्रे यत्कार्यमुगितो विधीयते तदंचतेरेव धातोर्भवति नान्यस्य धातो रिति कार्यमात्रं नियम्यते न तु मागम एव' अधातुग्रहणं तु तत्र धातुभूतपूर्वस्यापि नुमागमार्थं तेन गोमंतमिच्छतीति क्यचि क्विपि च कृते गोमानित्यत्रापि नुमभव ति। अन्यथा धातुत्वादंचतिग्रहणान्नियमार्थान्न स्यात् अन्येत्वाहुः' उगित इत्यस्य शतृः सोंचतेर्लुप्ताकारनकारस्यानुकरणं। विभक्तेश्च सुपां सुलुगिति लुक् भाविनं चाकारलोपमाश्रित्य चेतिनिर्देशः कृतः ततश्चांचतिग्रहणमिहैव नियमार्थं अकारनकारलोपयोश्चातत्रत्वात् नांचेः पूजायामितियदान

उगित्संचतिग्रहणात्सिद्धमधातोः' उगिति अंचतिग्रहणात् अधातोः सिद्धं' अंचतिग्रहणं नियमार्थं भविष्यति' अंचतेरेवोगितो धातोर्नान्यस्योगितो धा तोरिति "वनो रच" इह कस्मान्न भवति निः प्युनी अतिपूनीति' अर्थवद्ग्रहणे नानर्थकस्येति एवमपि मघोनी अत्र प्राप्नोति' मघवन्शब्दः श्वुसन्नंप्रातिप दिकं वनो न हशः' वनो रचेसत्र हशंतान्न भवतीति वक्तव्यं' इह माभूत् सहयुध्वा ब्राह्मणीति' यदि न हशः इत्युच्यते शर्वरीति न सिध्यति' विहितविशेषणं हशग्रहणं' हशंताद्यो विहित इति' एवमपि प्रेर्वरीति न सिध्यति कथं चात्र तु गागमः॥ ॥ ॥ ॥

लोपः प्रतिषिध्यते तदापि ङीप् भवति' वनो रच' निः प्युनीति' प्युनो निः क्रांता युवानमतिक्रांतेति प्रादिसमासस्ततो ङीप् श्व न शहस्य गौरादिपाठे श्वुसज्ज्ञे नत्वादत्र ङीप् भ वति' मघोनीति मघमस्यास्तीति छेर्दसीवनिपौ वक्तव्यावितिवनिप् स चार्थवानिति प्रश्नः' अश्वुसन्नमिति श्वन्नुक्षन्निति सौत्रादिको मघवं च्छद् उणादिषु च नावशंप श्वुसन्निनिमित्तं कार्यं भवतीति प्रागेवोक्तं वनो न हश इति द्वयोरपि ङीब्रप्रयोर्निषेधः सहयुध्वेति सहे चेति क्वनिप् शर्वरीति शृ हिंसायामिति तस्मात् अन्येभ्योऽपि दृश्यं त इति वनिप् तत्र गुणे रपरत्वे च कृते हशंतो न भवतीति पूर्वः पक्षः प्रेर्वरीति ईर् गताविति तस्मात् पूर्वोदन्येभ्योऽपि दृश्यंत इति क्वनि वनिपोरन्यतरः स च हशंता द्वि हित इति ङी ब्रो न स्यातामिति प्रश्नः॥ ॥

छांदसत्वादिति । मईइति शब्दाद्देरूङ्ट्चेत्युणादिसूत्रमनपेक्ष्यैतदुक्तं । यज्वरीरिति । सुयजोर्ङ्वनिप् । वां छंदसीति पूर्वसवर्णदीर्घः । बहुधीवरीति । बहवो धीवानो ऽस्या इ
ति बहुव्रीहिः । तत्रानो बहुव्रीहेरिति ङीपः प्रतिषेधः प्राप्नोति । रेफस्य ङीप्सन्नियोगेन विधानात्तदभावादेवाभावप्रसंगः । यदि वा स्त्रियां यदुक्तं तत्समस्तं स्या
न्नो बहुव्रीहेरिति प्रतिषेधविधानाद्वनो ङीब्रौ न प्राप्नुतः । तस्माद्वनो र च बहुव्रीहेश्चेति वक्तव्यमित्यर्थः । तत्र बहुव्रीहेश्चेत्यनेन लक्षणं तदेतानन उपधा
लोपिन इत्यनेन विहिते ङीपि रेफमात्रं विधेयं यदि तु द्वावपि ङीब्रौ विधीयेयातां तदा सुपर्वादेरनुपधालोपिनो पि स्यातां । अन इति । अनो बहुव्रीहेरि

×यज्वनीरिषः×१

छांदसत्वात् ङीब्रावपि तर्हि छांदसत्वादेव भविष्यतः । बहुलं छंदसि बहुलं छंदसि ङीब्रौ वक्तव्यौ यज्वरीरिषः । रविधाने बहुव्रीहेरुप
संख्यानं प्रतिषिद्धत्वात् रविधाने बहुव्रीहेरुपसंख्यानं कर्तव्यं बहुधीवरी । किं पुनः कारणं न सिध्यति प्रतिषिद्धत्वात् अनो बहुव्रीहे
रिति प्रतिषेधः प्राप्नोति [illegible] अनो बहुव्रीहेः प्रतिषेधे वोपधालोपिनो वा वचनं अथवा अनो बहुव्रीहि प्रतिषेधे उपधालोपिनो
वेति वक्तव्यं अन्यथा कृत्वा चोदितमन्यथा कृत्वा परिहारः यथोपसंख्यानं चोदितं तथा नित्यौ स्यातां ङीब्रौ स्यातां भवितव्यं यथा परिहार
स्तथा विभाषया भवितव्यं यथोपसंख्यानं चोदितमेवमपि विभाषया भवितव्यं न ह्यत्र ङीपं दुर्लभः सिद्धोऽत्र ङीप् अन उपधालोपिनो
ऽन्यतरस्यामिति ॥ श्री ॥ ॥

तस्मादनंतरमुपधालोपिनो वेति वक्तव्यं तेनानउपधालोपिनोऽन्यतरस्यामित्येतन्न वक्तव्यं भवति तत्रानुपधालोपिनो नित्यो ङीप्प्रतिषेधो भवति सुपर्वे
ति उपधालोपिनस्तु ङीप्विकल्पस्तेन बहुराज्ञी बहुराजा नौ बहुराजे इति रूपत्रयं सिध्यति एवं बहुधीवरी बहुधीवानौ बहुधीवे इति वन्नंतस्माप्युपधालोपिनो रू
पत्रयं भवति इतरः पूर्वोक्तमभिप्रायमप्रतिपद्याह अन्यथा कृत्वेति ॥ ॥ श्री ॥ ७५ ॥ ॥

×ग्रहणं हृदूxx

अन्येन सतीति प्रकरणान्तरविहितत्वात्तस्य ङीप इति भावः बह्व्रीहेश्चेति वचने न प्रकरणान्तरविहिते प्राप्तिके ङीपि रेफो विधीयत इति तदेव रूपत्रयं भवतीत्यर्थः किं पुनरिति ङी-
प्सन्नियोगमनपेक्ष्य रेफमात्रं वचनं तस्य स्त्रियां विधीयतां ततश्च बहुधीवरीत्यत्रापि रेफो भविष्यति न उपधालोपिन इत्यसने न च ङीबिति प्रश्नः ङाविति एतत्तत्रैव व्याख्यास्यते।
केचित्तु रर्थन्ति वन्निति प्रसज्य ग्रहणं वा ततश्च भस्य यग्रहणं यस्मात्सविहित इति कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति वा बहुधीवरीति रेफो न प्राप्नोति नैष दोषः

ङीप्सन्नियोगेन र उच्यमाने अन्येन सतीति न स्यादित्येवमर्थमुपसंख्यानं चोद्यते किं पुनः कारणं ङीप्सन्नियोगेन र उच्यते इह मा भूत् सुपर्वो चारूप-
र्वेति तत्र स्येवोपसंख्यानेऽकर्तव्यं न कर्तव्यं वक्ष्यति ङाबुभाभ्यामन्यतरस्यामित्यत्रान्यतरस्यांग्रहणस्य प्रयोजनं ङाप्प्रतिषेधाभ्यां मुक्ते ङीब्रावपि य-
थास्यातामिति नषट्स्वस्रा कस्यायं प्रतिषेधः ङीब्रनन्तरस्तस्य प्रतिषेधः अथेदानीं ङीपि प्रतिषिद्धे षट्संज्ञानामन्ते लुप्ते टाबुत्पत्तिः कस्मान्न
स्यात् अत इति प्राप्नोति असिद्धो नलोपः तस्यासिद्धत्वान्न भविष्यति परिगणितेषु कार्येषु नलोपोऽसिद्धः न चेदं तत्र परिगणने इदमपि त-
त्र परिगणने कथं प्रत्याहाराच्चापासिद्धा सुबिति ने इत्यस्य यग्रहणं किं तर्हि प्रत्याहारग्रहणं कस्य विशेषानां प्रत्याहारः प्रथमैकवचनात्प्रभृ-
((साचापः पकारात् यदि प्रत्याहारग्रहणं॥ ॥ ॥

=किं पुनः कारणमिति स्वस्ने णेपसंख्या
=नेनत्वाङ्कमिति मानान्तर सि ङीप्सन्नि
=योगेन रो विधीयते अपूर्वो देव बहुधीवरी
=किं न विधीयते इत्यर्थः अपूर्वविधाने
=चनितमिति यस्मादिति भावः। तत्र हीति
=उपधालोपिनो वेति न्यासाभावे इति रेफः

अमहन्नवमिति प्रतिषेधे [illegible] न्योपिनत्वात् नषट्कस्यायमिति परि ङीपः प्रतिषेधस्तदा पञ्च ब्राह्मण्य इत्यत्र नलोपे सति स्वदन्तत्वाट्टाप् प्राप्नोतीति मत्वा प्रश्नः।
आचार्यः शिष्यबुद्धिपरीक्षार्थं परिहाराभासमाह ङीब्रनन्तर इति यस्तु टाबुचीति पाठं तादृगाविहितस्तस्यात्र प्रसङ्गाभावात् ङीब्रनन्तर इत्युक्तं परिगणितेष्विति
नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति इति नियमार्थं सुबादिविधिष्वेव नलोपोऽसिद्धो नान्यत्रेत्यर्थः आचापर इति यज्ञ्श्चा विसस्यातत्र प्रत्याहारे टापोऽन्तर्भावात् टाब्विधिः सुब्वि-
((धिः [illegible] तत्र नलोपस्यासिद्धत्वमस्त्येवेत्यर्थः॥ ॥

दोषस्त्विल इतिं तत्र हि सुब्विधिरिति सर्वे विभक्त्यंतावयवः समासस्याश्रीयते। ततश्चटापि सुपि विधिरित्वं सुब्विधिर्भवतीति इत्वे कृते खेन त्लोपस्यासिद्धत्वात्कास्
वेंः काऐन भवतीति इत्वं न स्यादित्यर्थः। स्त्रियां यत्प्राप्नोतीति अर्थो ग्रय प्राप्तिमात्रापेक्षोऽयं प्रतिषेध इत्यर्थः। डाबु योगाभ्यामिति यो गाभ्यां प्रकृतियोग शब्दे नो
च्यते। प्रकृतमिति द्वयोरपिस्थितत्वप्रतिज्ञानादपेक्षणाद्वेति भावः। एवमुभाभ्यामिति प्रसाख्या नंताबुभावपीति यद्यपि यत्नेव ङी प्रतिषेधस्तत्रैव डाप्स्यात्
तदाप्रतिषेधा येव मनो ऽन विलुच्येत ततोः नो बहुव्रीहेरित्यनेनापि डाबेव विधीयेत तस्य एव हि ङीपं बाधिष्यते किं प्रतिषेधेन। तस्मा उभय विधानसाम
धमवि२

दोषस्त्विले इत्वे दोषो भवति बहुचर्मिका प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुप इति न प्राप्नोति तस्मान्नो भौ तस्मात्स्वदंतकेभ्य उभौ न भवत इति व
क्तव्यं तत्तर्हि वक्तव्यं न वक्तव्यं। स्त्रियामिति वर्त्तते स्त्रियां यत्प्राप्नोति तस्य प्रतिषेधः षट्‌संज्ञानामंते लुप्तेटावुसत्निःकस्मान्न स्यात् प्र
साहाराद्यायामिदं दोषस्त्विले तस्मान्नो भौ डाबु किमर्थमुभाभ्यामित्युच्यते उभाभ्यां योगाभ्यां डाब्यथा स्यात् मन्नंतात् अन्नंतोपेक्ष नैतदस्ति
प्रयोजनं प्रकृतमुभयमनुवर्त्तते अथान्यतरस्यां ग्रहणं किमर्थं अन्यतरस्यां डाब्यथा स्यात् डापामुक्ते प्रतिषेधोपि यथा स्यादिति
नैतदस्ति प्रयोजनं इह डाबुच्यते प्रतिषेधोपि तावुभावुच्यते नाङ्क्षियतः इहं ते हि प्रयोजनं डाप्प्रतिषेधाभ्यां मुक्ते ङी बपि यथा स्या
त् सिद्धो ङीप्। अनउपधालोपिनो ऽन्यतरस्यामिति अथ तदन्यतरस्यां ग्रहणं शक्यमकर्त्तुं॥ ॥ ॥

ण्यो उभयं भवियतीत्यर्थः सिद्धो ङ्ग्रेति ननु यत्र ते ननसिद्धातिसुपर्वैस्यादेः तदर्थमन्यतरस्यां ग्रहणं स्यात् नैतदस्ति पदानेनान्यतरस्यां ग्रहणेन पक्षे ङीबनुत्ता
यते तदानउपधालोपिन इत्येतन्नियमार्थं भवति। उपधालोपिन एवान्नंतात् ङी भवति नान्यस्मादिति ततश्च सुपर्वैस्यादेरनुपधालोपिनो ङीपानभा
वमेव वापयतदिति अंतालेविचारः क्रियते इदमेवान्यतरस्यां ग्रहणं भवतु तत्र संनकर्त्तव्यं भवतीति मन्यते॥ ॥ ॥

=योगाभ्यांप्रसपविधेरसंभवा
=दाह-योगाभ्यामिति-२=

ऋतऽः कारणं समस्यते । बाढमिति । ईबपीति । अन्यतरस्यांग्रहणेनाचसेन प्रापित इति भावः । इदं लिति । अस्मिन्नन्यतरस्यांग्रहणे क्रियमाणे न तुपधालोपिनो
न्यतरस्यामिति नियमार्थं कर्तव्यं तदेवेहास्ते अन्यतरस्यांग्रहणे विध्यर्थं भविष्यतीति भावः । इदमपीति । असति ह्यन्यतरस्यांग्रहणे न उपधालोपिनोऽन्यतरस्यामि
ति सूत्रं विध्यर्थं स्यात् । ततश्च मकारान्तेरणी ङीपो विधानाद्वनोरचेत्यनेन ऋन्नेभ्यो ङीबिसेत तत्र विधीयमान ङीपसन्नियोगेन विधीयमानो रेफो बहुधीवरी स
त्र न स्यात् बहुधीवनीति स्यात् । सति त्विहान्यतरस्यांग्रहणे न उपधालोपिन इति सूत्रं नियमार्थं भवति न तु विध्यर्थमिति बहुधीवरी सत्र ऋन्नेभ्यो ङीबिस

बाढं शक्यं कर्तुं यद्यहडाबप्युच्यते प्रतिषेधोऽपि ङीबपि तत्सर्वं च वचनाद्भविष्यति । नैवं शक्यं विज्ञातुं अक्रियमाणे हि तत्रान्यतरस्यांग्रहणे
अनवकाशो ङीप् डाप्प्रतिषेधौ बाधेत । डाप्प्रतिषेधावप्यनवकाशौ तौ वचनाद्भविष्यतः । सावकाशो डाप्प्रतिषेधौ कोऽवकाशः सुपर्वा चारुपर्वे
ति । तस्मात्तदन्यतरस्यांग्रहणं कर्तव्यं । इदं तु खल्वन्यतरस्यांग्रहणं शक्यमकर्तुं । इदमप्यवश्यं कर्तव्यं किं प्रयोजनं डाप्प्रतिषेधाभ्यां
मुक्ते ङीब्यथा वपि यथा स्यात् तामिति रविधानेन बहुव्रीहेरुपसंख्यानं चोदितं तन्नवक्तव्यं भवति अथेह कथं भवितव्यं बहवः श्वानोऽस्यां रथ्या
यां बहवो युवानोऽस्यां शालायामिति बहुशूका बहुयूका इति भवितव्यं का रूपसिद्धिः डाप् टिलोपः संप्रसारणं संप्रसारणपरपूर्वत्वं घत नेर
श्वेति कप् कपा तावन्न भवितव्यं किं कारणं न घेता नां यो बहुव्रीहिरित्येवं तद्विज्ञायते न चैष नघेतानां बहुव्रीहिः संप्रसारणेनापि न भवितव्यं ॥ ७ ॥
नेनैव ङीप् भवति । ततश्च वनोरचेति रेफादेशः सिध्यति । यदि तर्ह्यन्यतरस्यांग्रहणेन पक्षे ङीबनुज्ञाप्यते तदा मनन्तान्न अपि प्राप्नोति । व्यवस्थितविभाषाविज्ञानान्न भविष्यति ।
अथवा डाबुभाभ्यामित्येको योगः क्रियते ततोऽन्यतरस्यामिति द्वितीयस्तत्रानो बहुव्रीहेरिति वर्तते तेन न तु मन इति । अथेहेति । यद्यत्र घतश्चेत्यनेन न घेताद्बहुव्रीहेः क
विधीयते तेनैतज्ञापितं यामाव्यं अयं न घेतानां वर्णियहानां यो बहुव्रीहिस्ततः कप् विहितस्तत्र कपान भाव्यमिति संघाप्य पृच्छति । आचार्यदेशीय आह बहुशूके ति
संप्रसारणपरपूर्वत्वमिति संप्रसारणस्य उपश्लेषार्थः नतो हल इति संप्रसारणान्तस्य दीर्घत्वम् अंगप्रत्यययोरेकादेशस्य पूर्वंप्रसंतवद्भावात्ततो न दीर्घसंज्ञायामुपजातायां

=दीर्घप्रवृत्तिनिमित्तं संप्रसारणान्तत्वं तदन्तांगत्वं चोपपादयति· अंगेत्यादि· हल इति सूत्रे अंग इत्यस्य सामर्थ्यात्तद्विधावप्यतिदेशप्रवृत्तिः। एवं कपोनिमित्तं बहुव्रीहित्वमपंन्नभवतीत्याशयः ॥

= = कुरुचरशब्दे हि टित्त्वादश्रयोऽसमुदायेन प्राप्नोतीति निषेधस्त्वैयर्थ्यापत्त्यादिकां विधेराक्षिमाह· तत्रेति·२= आर्धधातुकेआयस्यैकल्पिकत्वेन केवलेनाद्वारितार्थमितिभावः।३=
=अणस्त्रीपमिः अप्रधानमुपसर्जनमित्यस्य ग्रहणेतु कुरुचरीत्यत्राल्लीस्यापि स्यात् कुरुचरी नस्याप्रधानत्वात्·२=

भा० कै०४
१८

वस्पतीति। इपि परतः पूर्वमंगंशवं तन्तुप्रसयांतरइति संप्रसारणस्य इणपश्च समानांगत्वानास्तीत्युकाराकारयोरेकादेशभावो यथा शकन्ध्वादिति। अनुपसर्जनात् उपसर्जने नमिह शार्ङ्गरवी यंग्रह्यते समासाद्यवयवभूतं तच्चावयवाश्रयं कार्यं समुदायस्य न प्राप्नोति। यदेव यदेवकार्यं मकृतार्थं तत्समुदायस्य भवति यथा जुगुप्सतइत्यादावात्मनेपदं न तु यदवयवे कृतार्थं यथा पुण्णायतीति न भवत्यात्मनेपदं तदंतविधिश्च ग्रहवृत्तेतिप्रतिषिद्धः ततश्चानर्थको यं प्रतिषेधइतिमत्वाह। अनुपसर्जनादितिकिमर्थमिति इतरो। महत्वेतिप्रतिषेधेन तदंतविधिर्लापितइतिमत्वाह। बहुकुरुचरेति बहवः कुरुचरा अस्यामि

संतग्रहणमनर्थकां१

वक्ष्यत्येतत् ष्यादीनां प्रसारणे तकारान्तप्रतिषेधार्थमिति परपूर्वत्वेन चापि न भवितव्यं वक्ष्यत्येतत् संप्रसारणपूर्वत्वे समानांगग्रहणमसमानांगप्रतिषेधार्थमिति तस्माद्धरुण्वावकुपुवेतिभवितव्यं अनु अनुपजेनादितिकिमर्थं बहुकुरुचरा। प्रियकुरुचरामथुरा नैतदस्तिप्रयोजनं कुरुचरशब्दात्स्य यो विधीयते तेन चकः प्रसंगोयत्बहुकुरुचरशब्दात्स्यात्। नैवप्राप्नोतिनार्थः प्रतिषेधेन तदंतविधिना प्राप्नोति अतउत्तरं पठति अनुपसर्जनग्रहणमनर्थकं प्रातिपदिकेन तदंतविधिप्रतिषेधात् अनुपसर्जनग्रहणमनर्थकम् किंकारणं प्रातिपदिकेन तदंतविधिप्रतिषेधात् ग्रहणवता प्रातिपदिकेन तदंतविधिः प्रतिषिध्यते ज्ञापकंतुपूर्वत्रतदंताप्रतिषेधस्य एवं तर्हि ज्ञापयत्याचार्यः पूर्वत्रतदंतविधिप्रतिषेधोन भवतीति किमेतस्य ज्ञापने प्रयोजनं भवती अतिभवती महती। अतिमहती सत्रतदंतविधिः सिद्धो भवति॥०

तिवहुव्रीहिः कुरुचरशब्द उपसर्जनमितिङीम्न भवति कुरुचरशब्दादिति टित्त्वाणिसत्रदित्यातिपदिकंगत्यते तच्च किंचित्साक्षादिद्धवति यथा नदट्चोरडितिकिंचित्ववयवद्वारेण अवयवेह्यित्र्त्रदित्वम किंचित्करं तत्र समुदायार्थं तद्धिताय तत्ससचावयवः कचिदानुपदिद्रवति यथा स्तनंधयीति कचिन्न दितः घुघुलादिः॥ कचित्कृतत्वुडादिस्तत्र यं समुदायं योऽवयवो न व्यभिचरतितत्र यं मवयवस्यदित्वमित्येनेनाभिप्रायेणोक्तं कुरुचरशब्दादितिनतुकृत्यग्रहणपरिभाषायोगेण

१ नहिदितित्कृतएवग्रहणं॥ ॥ ॥

एम०
१८

=ननुचरेस्यदित्वादीनोविधीयमानोऽपि तत एवप्राप्नोतिति तदंतविधावपि चरशब्दात्सर्वथापि कुरुचरशब्दादिस्युक्तमत आह· टिट्ठेति· प्रातिपदिकाधिकारादितिभावः। नन्ववयवदित्वद्वारेण समुदायस्य टित्वेबहुकुरुचरेत्रापिस्यादत आह· तत्रयमिति·=१=

=नकुधनोरदेत्यत्र वक्ति किं प्रत्ययग्रहणात्कथं ग्रहणवने ति निवेधोत आह बनोरदेत्यत्रेति प्रत्ययग्रहणपरिभाषयेति भावः तथा च सामर्थ्याद्गृहीते न वन्नंत प्रातिपदिकेन प्रातिपदिकाधिकारे विशेष्यसंभवन्नापित दंतविधिः प्रतिषेधान्कस्यास्मात् तदापकार्पवसा निनासर्य ० १ =

बहुधीवरीति बनोरचेत्यत्र वन्नंतस्य प्रातिपदिकस्य ग्रहणादेव तदंतविधिनेत्यादिति भावः उपसंख्यानात्तत्र सिद्धिमत्वाह एतदपीति अतिधीवरीति धीवानमतिक्रांतेति तत्पुरुषः न नुअमहत्सर्वेत्स्यने नैव ज्ञापितस्तदंतविधिस्तत्र सूनार्थोऽनेन ज्ञापकेनेत्याह एवं सूत्रनिर्देश इति वा शब्दस्तु अर्थे अथवा एवं तदंतविधेर्ज्ञापितत्वा उपसर्जनेनापि तदंतविधिः स्यादिति प्रयोजनसमुच्चयार्थो वा शब्दः एवं सूत्रशब्देन एवं चार्यस्तं व्याकरणमुच्यते =पापिशलिना प्रोक्तमिति तीनस्थेत्युपसर्गततोऽध्येत्रांतरधीतइत्यण् तस्य प्रोक्ता लुगिति लुक्

नैतदस्ति प्रयोजनं उक्तमेतत् तवस्यैप्यु गितः प्रत्ययो प्युगितः प्रातिपदिकमप्युगिदिति इदं तर्हि बहुधीवरी बहुपीवरीति एतदपि नास्ति प्रयोजनं अत्राप्युक्तं रविधाने बहुब्रीहेरुपसंख्यानं प्रतिषिद्धत्वादिति इदं तर्हि अतिधीवरी अतिपीवरीति एवं सूत्रनिर्देशो वा पिशलमधीत इति एवं सूत्रनिर्देशो वा पुनरयं इष्टव्यः एवं सूत्रे अप्रधानस्योपसर्जनमिति इहं ज्ञाक्रियते यावद्ब्रूयात्प्रधानादुत्पत्तिरप्रधानान्नेति तावदनुपसर्जनादिति किं प्रयोजनं आपिशलमधीते ब्राह्मणी आपिशला ब्राह्मणी अणंतादिति ईकारो माभूदिति अथानुपसर्जनादित्युच्यमाने कस्मादेवात्र न भवति अणंतमेतदनुपसर्जनं नानुपसर्जनग्रहणेनाणंतं विशेष्यते अणंतादनुपसर्जनादिति किं तर्हि अणेव विशेष्यते अणयः अनुपसर्जनमिति जातिश
(१) हेस्पत्तत्वतिप्रसंगः॥ ॥ ॥ ॥

प्रोक्तप्रत्ययस्याणोऽत्रोपसर्जनेन ▇▇▇ मत्र भवति अणंतमिति प्रत्यये लुप्तेप्रकृतेरेव तदर्थाभिधानादिति भावः अणेवेति अत्र प्रोक्तार्थस्योपसर्जनत्वादर्थद्वारेणाणप्रत्ययः उपसर्जनमिति भावः यत्वध्येत्रांप्रत्ययउत्पन्नस्तस्य लुप्तत्वान्नदाभ्रयो ङीन्न भवति। प्रत्ययलक्षणेनापि न भवत्यणोऽकार इति विज्ञानानात्॥ ॥ ॥

=ननु तेन तदंतविधिज्ञापनेव
=कुकुसचरेत्याघर्यमधिका
=स्थाक्षयक इति तमर्थद
=समुक्तमत आह अथ वेति

अतिप्रसंग इति तेन तेभ्योऽपि प्रतिषेधः प्राप्नोतीत्यर्थः। अवन्तीति। अवन्तेरपत्यं स्त्री वृद्धेत्कोशलाजादाञ्ञ्यङ् तस्य स्त्रियामवन्तिकुन्ति कुरुभ्यश्चेति लुक्। गांधारीति। गांधारेरपत्यं स्त्री साल्वेयगांधारिभ्यां चेत्यञ् न तस्मात्तस्येति लुक्। अत्र प्रत्ययार्थप्रतिपत्त्यर्थस्योपसर्जनत्वादितो मनुष्यजातेरिति ङीष् न प्राप्नोति। तस्य तु दाक्षीसादिरेवकाशः। सिद्धं त्विति। प्रत्यये लुप्ते प्रकृतिरेवोपसर्जनलक्षणं जातिमाहात्त्वानुपसर्जनमित्यर्थः। एतदपीति। यदुक्तं सर्वे सूत्रनिर्देशेविति तत्र भाष्यकारः प्रत्याचष्टे। स्त्रियां योऽस्तीति। आपिशलशब्दानुपयो

जातिशब्देभ्यस्त्वतिप्रसंगो भवति अवन्ती कुन्ती गांधारी सिद्धं तु जातेरनुपसर्जनत्वात् सिद्धमेतत् कथं अनुपसर्जनादित्युच्यते नच जातिरुपसर्जनं एतदपि नास्ति प्रयोजनं स्त्रियामिति वर्तते तेनाणं विशेषयिष्यामः स्त्रियां योऽण् विहित इति एवमपि काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी काशकृत्स्नीमधीते काशकृत्स्ना ब्राह्मणी अत्र प्राप्नोति नैष दोषः अध्येत्र्यामभिधेयायामण् ईकारेण भवितव्यं यच्चाध्येत्र्यामभिधेयायामण् लुप्तः सः यश्च श्रूयते उत्पन्नः तस्मादीकार इति कृत्वा पुनर्न भविष्यति इदं तर्हि प्रयोजनं प्रधानेन तदन्तविधिर्यथा स्यात् कुंभकारी नगरकारी अत्र हि प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीति अवयवादुत्पत्तिः प्राप्नोति कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवतीति संघातादुत्पत्तिर्भविष्यति

॥ कृद्ग्रहण इत्युच्यते। नचैतत् कृद्ग्रहणं कृदकृद्ग्रहणमेतत्। कृदप्ययमण् तद्धितोऽपि॥ ॥

कार्येऽण्प्रत्ययः स स्त्रियां न विहितः उत्पन्न इति सोऽपि लुक्कृद्धितलुकीति लुप्तः पुनर्नेति सकृत्प्रवृत्तौ शास्त्रस्य चरितार्थत्वात् पुनः प्रवृत्त्यभावः अकारान्तस्य चाध्येत्र्यां स्त्रियां वर्तमानाद्भवति इदं तर्हीति प्रधानेन तदन्तविधेर्ज्ञापनार्थमित्यर्थः ननु च महत्सूत्रे वैतिज्ञापितो सौ एवं तर्हि ज्ञापकात् यथा प्रधानेन भवति एवमुपसर्जनेनापि स्यादिति सवेयायं योगः कृतः भाष्यकारेणानुसूत्रमेवेदं ज्ञापनमाश्रितं गणपठितप्रतिषेधानपेक्षया सर्वोऽस्तीति भाष्यमनुपसर्जनादिसयं योगः प्रत्याख्यायत इत्या

तदपेक्षमेतिः स्त्रियामित्यस्य प्रत्ययमाणविशेषणत्वापेक्षयाचेतिर्भावः

=एवं च स्त्रीप्रत्ययांतप्रातिपदिकाद् ङीको विधानसामर्थ्येन प्रत्ययग्रहणपरिभाषा न प्रवर्तत इति भावः ।१८=

एवं तर्हीति कुंभस्य कारी शब्दे नोपपदलक्षणः समासः करिष्यते स्त्रीभ्यो ढगित्यत्र च ङ्याप्प्रातिपदिकादिति त्रितयाधिकारात् स्त्रीप्रत्ययांतात्समासप्रातिपदिकात् ढग्विधास्य ते। समासमंतरेण स्त्रीप्रत्ययांतस्य प्रातिपदिकस्यासंभवात् समासः स्त्रीप्रत्ययांतो गृह्यते ङ्याबंतेभ्य स्वसुप एर्प्रादिभ्यो ङ्याब्ग्रहणानुवृत्त्या भविष्यतीति भावः अव्यया दिति अत्र चोदयंति कृत्तद्धितसमासाश्चेत्यत्र कृद्ग्रहणपरिभाषया कुंभकारशब्दस्य प्रातिपदिकत्वात्ततएव ङी भविष्यतीति तदयुक्तं अत्रासां परिभाषायाः अनुपस्थानस्य प्रयोगतः प्रतिपादनात् नन्वेवमपि कारशब्दात् ङीपि विहिते कुंभकारीशब्दादेव ढग्भविष्यति। स्त्रीप्रत्ययग्रहणे तदादिनियमाभावात्। तथा च पर

एवं तर्हि ईकारांतेन समासो भविष्यति यद्येवं लभ्येत कृतं स्यात् तत्तु न लभ्यं किं कारणं अत्र हि गतिकारकोपपदानां कृद्भिः सह समासो भवतीति समासः एवं ता वद्भवति समासे च कृते अवयवाः उत्पत्तिः प्राप्नोति अवयवादुत्पत्तौ सत्यां को दोषः कौंभकारेयो न सिध्यति अवयवस्य र

१ ङ्यिस्वरौस्यातांतस्मादत्रुपसर्जनाधिकारः॥ श्री ॥७१॥

मकारीषगंधीपुत्र इत्यत्र संप्रसारणं भवति एवं तर्हि तदादिनियमाभावाद् नियमः प्रसज्येत तथा च कदाचित्कारीशब्दात्प्रत्ययः स्यात् कदाचित्कुंभकारीशब्दात् यदा तु कुंभकारशब्दात् ङीप् विधीयते कुंभकारीशब्द एव स्त्रीप्रत्ययांतो भवति न तु कारीशब्द इति ततः प्रत्ययो न भवति ननु कदाचिन्नियमाभावात् कारीशब्दोऽपि स्त्रीप्रत्ययांतो भवतीति ततोऽपि ढक्प्रसंगः नैष दोषः नियमप्रतिषेधेनाधिकस्य तदंतस्य कार्यं विधीयते न तु न्यूनस्य अपवादः स्त्रीप्रत्यये तदादिनियमाभावमनाश्रित्य

तदा २ १ कुंभकारीतिप्रयोजनमुक्तं॥ ॥ ॥ ॥

=नन्वसत्यपि प्रधाने नतदंतविधौ स्त्रीप्रत्यये तदादिनियमाभावात् कुंभे नैकार्थी[illegible] ततः स्वनिकृष्यापत्त्यनानन्यथा[illegible] [illegible] अथवेति तदाश्रयणे नुप्रयर्थमेवेदमिति ध्वनयति=१८=

सुपर्णीति शोभनानि पर्णान्यस्याः इति बहुव्रीहिः। तत्र पर्णशब्दस्य उपसर्जनत्वात् ङीष् न प्राप्नोति। नवेति सुपर्णशब्दो जातिवाचि प्रातिपदिकं न चाप्यनुपसर्जनं बहुकुरान
गी सत्र तु जातिवाचिनः कुक्कुटशब्दस्योपसर्जनत्वात् समासस्य जातिवाचित्वात् ङीषो भावः। जाते रिति जातेरित्यनुवर्तमाने पाक[illegible]र्णपर्णेत्यनेनेत्यर्थः बहुव्रीहि

अनुपसर्जनाधिकारे जातेर्ङीष्विधाने सुपर्ण्या उपसंख्यानं। अनुपसर्जनाधिकारे जातेर्ङीष्विधाने सुपर्ण्या उपसंख्यानं कर्तव्यं। सुप
र्णी। न वा समासस्यानुपसर्जनत्वाज्जातिवाचकत्वाच्च शब्दस्य सामान्येन ङीष्विधानं। न वा एष दोषः। किं कारणं। समासस्यानुपसर्जनत्वात्
समासोऽत्रानुपसर्जनं। स च जातिवाचकः। समासस्यानुपसर्जनत्वात् जातिवाचकत्वाच्च शब्दस्य सामान्येन ङीष् भविष्यति। जातेरस्त्री
विषयादयोपधादिति। कथं कृत्वा चोदितं कथं कृत्वा परिहारः। बहुव्रीहिरिति कृत्वा चोदितं तत्पुरुष इति कृत्वा परिहारः॥ ॥ इति
श्रीमद्भगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये चतुर्थाध्यायस्य प्रथमे पादे प्रथममाह्निकं॥ ॥ ॥

रिति। नास्त्यनुपसर्जनमस्मिन्नित्यनुपसर्जनमित्याश्रीयमाणे पर्णशब्दस्योपसर्जनत्वात् ङीष् न स्यात्। तत्पुरुषे तु दोषाभावः। समासस्योपसर्जनत्वाभावात्॥ ॥
इत्युपाध्यायजय्यटपुत्रकैय्यटकृते महाभाष्यप्रदीपे चतुर्थाध्यायस्य प्रथमे पादे प्रथमाह्निकं॥ ॥श्री ॥७॥ ॥

=अन्यथा आद्युदात्तत्वमनेन २८ =प्रसंगेनेति ननु प्रकृते ऽनुको ग्रहणमनुपपन्नं प्रयोजिकास्येसर्थः॥ २

टिड्ढाणञ् तव्यग्रहणम् इति पूरणगुणेति तव्येन समासप्रतिषेध उच्यमानः तव्यता न भवतीति ब्राह्मणेन कर्तव्यमिति समासो भवत्येव तत्र कृत्स्वरेणान्तस्वरितं भवति। तव्येन तु समासे कृत्स्वरेण तथा ह्याकार उदात्तः स्यात् दिव ग्रहणम् इति नेनाक्षद्यूरिति दिव औदिति न भवति अक्षद्यूभ्यामिति दिव उदिति न भवति अन्यथा उठि कृते एकदेशविकृतस्यानन्यत्वादौत्त्वे स्यातां॥ परिभाषायां तु ससांप्रातिपदिकस्य स्वर्गतिरीक्षवाचिनो दिवशब्दस्य ग्रहणं। प्रसंगेन परिभाषान्तरमपि पादनायाह ननु चेयमितिसए

=तिन्वादिनमित्यनेन १

टिड्ढाण ढग्रहणे सानुबंधकस्योपसंख्यानं ढग्रहणे सानुबंधकस्य उपसंख्यानं कर्तव्यं। कारिकेयी हारिकेयी किं पुनः कारणं न सिध्यति अननुबंधकग्रहणे हि न सानुबंधकस्य॥ अननुबंधकग्रहणे हि न सानुबंधकस्य ग्रहणं भवतीति एषा परिभाषा कर्तव्या। का न्वेतस्याः परिभाषायाः प्रयोजनानि। तव्यग्रहणे तव्यत् ग्रहणं मा भूत्। दिव्ग्रहणे दिवु ग्रहणं मा भूत्। ननु चेयमपि कर्तव्या तदनुबंधकग्रहणे अतदनुबंधकग्रहणं नेति का न्वेतस्याः परिभाषायाः प्रयोजनानि यङ्ग्रहणे एप ङ्ग्रहणं मा भूत् अङ्ग्रहणे च ङ्ग्रहणं मा भूत् ते द्वे एते परिभाषे कर्तव्ये। न कर्तव्ये। आचार्यप्रवृत्तिर्ज्ञापयति भवत एते परिभाषे इति यदयं वामदेवात् ड्यत्ड्याविति यय तो ङितौ करोति तज्ज्ञापयति नोपसंख्यानं कर्तव्यं न कर्तव्यं अननुबंधकोऽठ शब्दः स्त्रियां नास्ती

॥ निकृत्वा सानुबंधकस्य ग्रहणं विज्ञास्यते ननु चायमस्ति शिलायाढ इति॥ ॥ ॥

वानुबंधो यस्येत्यर्थः उपात्तानुबंधव्यतिरिक्तानुबंधयुक्तस्तदनुबंधकः यङ्ग्रहणे इति यतो ऽन्यावङ्सादाविसर्थः अङ्ग्रहणे इति ऋदृशोऽङि गुण इत्यत्र च ङो ग्रहणमावाङ्ङि विधीयमानं ग्यते रङ्सत्वं चरि न भवत्सु शि ष्वियङिति ड्यत् ड्याविति यस्येति लोपेन वामदेव्यमिति रूपे सिद्धे ङित्करणं यतो ऽन्यानतदर्थ इत्यत्र प्रयतोर्ग्रहणनिवारणार्थं एवं चेतनङित्वस्य प्रयोजनं भवति। यद्येते परिभाषे भवतस्तेना वामदेव्यमित्यत्रान्तोदात्तत्वं न भवति अपि तु ययतोश्चातदर्थे इति सर्वे पदप्रकृतिस्वरेणाद्युदात्तत्वं॥ ०॥

=तत्पुरुषे तुल्यार्थेत्यनेन १

नैषस्त्रियामितिशिलेव शिलेयमितिनपुंसकलिंगएवशिलेयशब्दः स्वभावात् कथंस्त्रीनामेति यत्र सभायांविदुषामेवपुरुषाणां साधुत्वं तावधिकाएदिति भावः न
नु सभायांसाधुरियंब्राह्मणपंक्तिः परिषदेतिसंभवतिस्त्रियाः सभायांसाधुत्वं एवंतर्हिछंदसिसभेयशब्दस्यैवंविधायांस्त्रियांमयोगाभावः अन्यग्रहणमिति
शार्ङ्गरवाद्यञोङीन्विधानादनंतरं ङीन्विधानमनर्थकं। स्वरेविशेषाभावाद् अंतस्याद्युदात्तत्वात् ङीपि ङीनिवाद्युदात्तस्यैवावस्थानात् औत्सीति उत्सेभवेति

नैषस्त्रियांवर्त्तते अयंतर्हिसभायायः छः छंदसीति। एषोपिनस्त्रियांवर्त्तते। किंकारणं। तत्रसाधुरितिवर्त्तते। कथंस्त्रीनामसभायांसाध्वीस्यात्।
अन्यग्रहणमनर्थकं। तदंताद्धिङीन्विधाने। अन्यग्रहणमनर्थकं। किंकारणं। तदंताद्धिङीन्विधाने। तदंताद्धि अनंतात् ङीन्विधीयते शार्ङ्गरवाद्यञो
ङीनिति। नचास्तिविशेषः अनंतात् ङीपोङीनोवाततदेवरूपं सएवस्वरः। नवाजात्यधिकारात् नवानर्थकं। किंकारणं। जात्यधिकारात् जातिरिति[illegible]
त्रानुवर्त्तते अजात्यर्थोयमारंभः औदपानी। औत्सी। नचावश्यं जातिग्रहणमनुवर्त्त्यं। अनधिकारेहि पुंयोगादाख्यायांङीन्प्रसंगः अननुवर्त्त
मानेहिजातिग्रहणे पुंयोगादाख्यायांङीन्प्रसज्येत वैदस्यस्त्रीवैदीति। यदितर्ह्यस्यनिबंधनमस्ति। इदमेववक्तव्यं। तन्नवक्तव्यं। तदप्यवश्यंवक्तव्यं
। अनुच्यमानेहितस्मिन् वैदस्यभगिनीवैदीति परत्वाज्जातिलक्षणोङीष् ङीपंबाधेत। ङीनिपुनः सतिपरत्वात् ङीन् ङीषंबाधते ष्वुन्उपसं
ख्यानं। ष्वुनउपसंख्यानंकर्त्तव्यं आढ्यंकरणी सुभगंकरणी असल्पमिदमुच्यतेष्वुन इति॥ ॥०॥

भवादावर्थे उत्सादिभ्योऽञ्निसन्नविधाने जातिवाचित्वाभावः वैदस्यभगिनीतिच्छन्नेनजातिवाचित्वंदर्शयति। याहिवैदस्यभगिनी सावैदस्यापत्यमितितस्यां
जातिनिमित्तएववैदशब्दः प्रवर्त्तते। नपुंयोगनिमित्तः परत्वादितिपरत्वग्रहणेनबाधकत्वंलक्ष्यते इत्यपवादत्वादित्युक्तं भवति ष्वुन इतिसूत्रे ष्वुनः पाठो
नार्थः॥ ॥

=ननुशार्ङ्गरवादितिसूत्रे जातिग्रहणमनुवर्त्ततो निरवकाशत्वात् ङीनः कथंपरत्वोक्तिरत आह परत्वे ति ९=

=अनन्तावाद्युदात्तादिष्वोः तत्र ङीप्याद्युदात्तत्वं ङीषि त्वन्तोदात्तत्वमिति विवेकः ।१=

नञ्स्नञीति तरुणतलुनशब्दयोर्वयोर्थे ग्रहणं तरुणी सुरेति प्रातिधर्मो हि वयः गौरादिषु तरुणतलुनशब्दयोः पाठात् ङीषपि स्वरे विशेषः अथवा वयोवाचिभ्यामपि
गौरादिपाठात् परत्वात् ङीषेव स्यादिति वयोवचनादपि तरुणतलुनशब्दावुपसंख्यानं प्रयोजयतस्तत्र सामर्थ्यात् ङीप् ङीषो विकल्पः यञश्च अपत्यग्रहणमिति अपत्ये
भवत्यपत्यः द्वैप्येति द्वीपे भवेति भवार्थे द्वीपादनुसमुद्रं यञिति यञ् । कञ्ञकारयोः यञश्चेति अयं संहितापाठ आर्षः तत्र गर्गादिभ्यो यञित्यत्राकारप्र
श्लेषाद्यञ् विधीयते स एव चेहानुक्रियते तेनात्राकारेऽनुनासिक इत्संज्ञक इह विशेषणार्थ इति यञोऽग्रहणाभावात् द्वैप्येति टाबेव भवति । यस्कादिभ्यो गोत्रे यञ

नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानं कर्तव्यं । नञ् स्त्रैणी । स्नञ् पौंस्नी । ईकक् शाक्तीकी । ख्युन् आढ्यंकरणी सुभगंकरणी तरुणत
लुनं तरुणी तलुनी । यञश्च । अपत्यग्रहणं द्वीपाद्यञः प्रतिषेधार्थं अपत्यग्रहणं कर्तव्यं द्वीपाद्यञः प्रतिषेधार्थं इह मा भूत् द्वैप्येति तर्हि वक्त
व्यं न वक्तव्यं नैवं विज्ञायते कञ्ञकारयः यञश्चेति । कथं तर्हि कञ्ञकारयोः यञश्चेति प्राचां तद्धितवचनं किमर्थं तद्धितवचनं षितः प्रातिपदिकादी
कारार्थं तद्धितवचनं क्रियते षितः प्रातिपदिकादीकारो यथा स्यात् नैतदस्ति प्रयोजनं षित्करणसामर्थ्यादेवात्र ईकारो भविष्यति यथैव तर्हि षि
त्करणसामर्थ्यात् अप्रातिपदिकादीकारो भवति एवं प्रातिपदिकादिसनुवर्तनसामर्थ्यात् अषितोऽपि प्रातिपदिकात् ईकारः स्यात् । अस्त्वस्य तत्प्रा
तिपदिकादिसनुवृत्तौ प्रयोजनं किमुत्तरार्थं ॥ ॥ ॥

ञोऽस्त्वे सत्राप्यकारप्रश्लेषः अथवा गोत्रग्रहणानुवृत्त्या गर्गादिभ्यो यञित्यस्यैव लुप्ताकारस्य निर्देशः प्राचां षित्करणसामर्थ्यादिति धातोस्तत्र पाठः षित्त्वमङीषौ
चरितार्थमिति तत्र पाक्षमे मा दौ ङीष् न भवति । यथैव तर्हीत्यादि षिद्गौरादिभ्यश्चेत्यत्र षित्प्रातिपदिकशब्दयोर्विशेषणविशेष्यभावो नास्तितरां समुच्चये न भा
व्यमिति भावः उत्तरार्थमिति अत्र त्वनुवर्तनं नान्तरीयकं । एतच्च गौरादिग्रहणाद्विज्ञायते समुच्चये गौरादिभ्यो ङीषः सिद्धत्वात् ॥ ॥ ॥

=एतच्चेति अत्रानुवृत्तेर्नान्तरीयकत्वं चेत्यर्थः । यद्यपि गौरादिग्रहणमितरप्रातिपदिकमात्रमर्थं तथापि व्याख्यानादत्र तत्सम्बन्धेन षित्प्रतिपदिकत्वं कार्यमिति भाष्याशयः ।१

अतइत्रितिं अन्यथातइति समर्थविशेषणंस्यादितिभावः सर्वत्र सिद्धमिति अचारंभसामर्थ्यात्याचामितिनसंभवत्यतइतिभावः सर्वेषामिति अपवादविषयाणामपीत्यर्थः। इहानुपयोगात्पूर्वसूत्रेण सर्वत्रग्रहणं संबध्यते नेनावद्यायनीतिप्राचांष्फः सिद्धोभवति अन्यथा स्यावद्याच्चेतिचाबुद्धीचांसावकाशः परत्वात्प्राग्दीव्यतो बाधेत कण्वात्त्विति गर्गादिषु कपिकतकुरूकत अनडुहकण्वशाकलेसेवं गणसन्निवेशः तत्रानडुहकुरूकतशब्दावतःस्थानात्पक्षव्यान्यत्र पठितव्यौ शाकलशब्दस्तकतकण्वशब्दयोर्मध्ये पठितव्यः। कतशाकलकण्वेति तत्रकतस्यांतः कतंतइतितस्यरू

अतइत्र्यादिश्लिः ञ्प्रिञ्। सर्वत्रसर्वेत्रग्रहणंकिमर्थं प्राचामेवहिस्यात् नैतदस्ति सिद्धमत्रपूर्वेण। इदंतर्हिप्रयोजनं सर्वेषामेवयथास्यात् आवध्यायनी चापं बाधित्वाष्फेयथास्यात् लोहितादिषु शाकल्यस्योपसंख्यानं लोहितादिषु शाकल्यस्योपसंख्यानंकर्तव्यं शाकल्यायनी [illegible] यदिपुनरयं शाकलशब्दो लोहितादिषु पठ्येत नैवं शक्यं इहहि शाकल्यस्यछात्राः शाकला इति। कण्वादिभ्यो गोत्रइत्यणन्स्यात्। एवंतर्हि कण्वात्तु शाकलः पूर्वः। कण्वशब्दात् शाकलशब्दः पूर्वः पठितव्यः। कतादुत्तरइष्यते। कतशब्दात् शाकलशब्दः उत्तरः पठितव्यः। पूर्वोत्तरौ तदंतादी ष्फाणौ तत्रप्रयोजनं पूर्वोत्तरौ गणौ तदंतादीइष्येते येकण्वादयस्तेषाकलादयः येकतपर्यंतास्तेशाकलपर्यंताः। किंप्रयोजनं ष्फाणौ तत्रप्रयोजनं। ष्फाणौतत्र प्रयोजयतः। कण्वात्तु शाकलः पूर्वः कतादुत्तरइष्यते पूर्वोत्तरौ तदंतादी ष्फाणौतत्र प्रयोजनं कौरव्यमंडूका कौरव्यमांडूकयोरासुरेरुपसंख्यानं। कौरव्यमांडूकयोरासुरेरुपसंख्यानंकर्तव्यं। आसुरायणी॥ ॥ ॥

षेण शाकलशब्द उच्यते शकंध्वादित्वान्निपातनाद्वापररूपत्वं। तथाकतेंतः तोयेषांतानिकतंतानि तत्रब हुव्रीहितत्पुरुषयो बहुव्रीहिः। शिष्यतेस्वरभिन्नानांयस्योत्तरस्वरविधिः सशिष्यतइतिवचनात्। एवं कण्वादिभ्योगोत्रइत्यत्राप्येकशेषः ष्फाणाविति शाकल्यायनीतिद्वियामनेनष्फः शाकल्यस्यछात्रा इतिछापवादः कण्वादिभ्यो गोत्रइति शैषिकोऽण्भवति। कौरव्या आसुरायणीतिप्राचांष्फ तद्धितइत्यसंचसूत्रपाठापेक्षयातद्धितग्रहणं प्रत्याख्या

आसुरीय इति आसुरिणा प्रोक्त इति शेषे छप्रत्यये इत्यणोऽपवादे छस्य प्रतिप्रसवरहे वल्लाघवार्थं क्रियते अन्यथा आसुरिग्रहणं कर्तव्यं स्यात्। वयसि वयस्य च
रम इति येन स्त्रीणां वयांसि इच्छन्ति। कौमारयौवनस्थविरत्वानि। तन्मतेनेदं वक्तव्यं। वधूट चिरंट शब्दयोर्द्वितीयवयोवचनत्वात् यदा तु द्वे एव वयसी। उपचयापचयल
क्षणे इति दर्शनं तदैतन्न वक्तव्यं। यौवनस्यापि प्रथमवयोरूपत्वात् उत्तानशयेत्यादि एते हि शब्दाः प्रथमवयोविषयाः प्रयुज्यन्त इति भावः नैतानीति नैषां वयःप्रवृ =बाल्यादिलक्षणं-२

छस्चेति वक्तव्यं आसुरीयः कल्पः। वयसि प्रथमे। वयस्यचरम इति वक्तव्यं इहापि यथा स्यात् वधूटी चिरंटीति इह कस्मान्न भवति उत्ता
नशया। लोहितपादिका। द्विवर्षा त्रिवर्षा नैतानि वयोवाचीनि कथं तर्हि वयो गम्यते संबंधात् वयो गम्यते यद्येवं तर्हि यत्र संबंधाद्वयो गम्य
ते तत्र न प्राप्नोति इहापि न प्राप्नोति कुमारीति अत्रापि संबंधाद्वयो गम्यते॥ कोऽसौ संबंधः योऽसौ पुंसा सहासंप्रयोगः संबंधादेवात्र
॰वयो गम्यते॥ श्री ॥ श्री ॥ ॥

त्तिनिमित्तमित्यर्थः संबंधादिति विशेषणविशेष्यभावलक्षणादित्यर्थः। तत्र च बहिरंगत्वाद्वयःप्रतीतेर्ङीप् न भवति कुमारीति पुंसा सहासंप्रयोगोऽस्य प्रवृत्तिनिमि
त्तं न तु प्रथमं वयः तथा च वृद्धकुमारीति प्रयोगः। पाणिगृहीती तु प्रथमवयस्यपि कुमारीशब्देन नोच्यत इति भावः संबंधादेवेति औपमिकाद्वाच्यवाचकभावलक्ष =स्वाभाविकात्-२
णात्संबंधादित्यर्थः कुमारशब्दस्य हि प्रथमं वयः प्रवृत्तिनिमित्तं साहचर्यात्तु पुंसा सहासंप्रयोगमुपादाय वृद्धायां गौणः कुमारीशब्दः प्रयुज्यते॥ ० ॥

=पुंसि तथैव दृष्टत्वात् प्रथमं वयस्यापंचमात्स्यात्कौमारमित्यकथा हि पाणिग्रहणं तु पंचमाद्वर्षादूर्ध्वमिति न पाणिगृहीती कुमारीशब्देनोच्यत इति तात्पर्यः।१=

=प्रकरणादिसापेक्षावधारणादिगर्भविशेषणविशेष्यभावादित्यर्थः। सर्वापि कदाचिदुत्तानशेते इति सामर्थ्यादुत्तानैव शेते इत्यवधारणघास्त्रीयतेन तत्र प्रकरणादेस्तत्त्वाभावे निश्चिते बाले लिंगम्यत इति तात्पर्यं-३=

=एतेन संबंधोपस्येति कुञ्चीदिः प्रमाणांतरं प्रकरणादिः विशेषणेन वाल्यादिना ।१=

संबंधसंबंधादिति कर्त्तृमात्रादेरभिधेयस्य शङ्कसंबंधस्य प्रमाणांतरावगतेन विशेषणेन संबंधादित्यर्थः कर्तृत्वमिति उत्तानशयेति शेतेति क्रियायाः कर्त्री शब्दार्थः यदा तु प्रकरणादिवशात् प्रथमवयो विशिष्टा कर्त्री प्रतीयते तदा प्रथमवयोविषयत्वं बहिरंगमित्यर्थः ॥ लोहितपादिकेति अत्रापि पदार्थमात्रं शब्दार्थः । विशेषप्रतिपत्तिः प्रकरणात् । द्विवर्षेति द्वेवर्षे भूते ति ठञो वर्षाल्लुक् चित्तवृत्तिरित्यमिति लुगत्रापि परिमाणमात्रं शब्दार्थः शालादावपि

=शेतिक्रियया ।१=

इह पुनः संबंधसंबंधात् इह तावत् उत्तानशयेति यदा कर्तृत्वं विशेषितं भवति तत उत्तरकालं वयो गम्यते लोहितपादिकेति यदा बहुव्रीह्यर्थो विशेषितः तत उत्तरकाले वयो गम्यते । द्विवर्षा त्रिवर्षेति यदा द्विग्वर्थो विशेषितः तत उत्तरं वयो गम्यते यदि तर्हि यत्र संबंधादेव वयो गम्यते तत्र भवितव्यं इहापि प्राप्नोति कन्येति । निपातनात्सिद्धं किं निपातनं कन्यायाः कनीन चेति अपरिमाणद्वितीयौ प्रतिषेधावुच्येते एकः शक्यो वक्तुं कथं एवं वक्ष्यामि । परिमाणांतात्तद्धितलुकि ङीब्भवतीति तन्नियमार्थं भविष्यति परिमाणांतादेव तद्धितलुकि नान्यत इति ततो बिस्ताचितकंबल्येभ्यो नेति । तद्धितलुकीत्येव ॥ ० ॥

=वर्षिपदार्थाभ्यां ।२=

=द्विगुनिमित्तप्रसयार्थः ।२

=एवं हि समाहारेत्स्यादिति भावः ।१=

प्रयोगात्त्वयः प्रतिपत्तिस्तत्प्रमाणांतरनिबंधना अपरिमाण परिमाणांतादेवेतितद्धितलुक्येवेत्येवतु विपरीत नियमो न भवति । लक्ष्यानुसारित्वाल्लक्षणस्येते न तद्धितलुकि समाहारे द्विगौ ठकीति ङी ब्भवति पंचभिरश्वैः क्रीता पंचाश्वेत्यत्र हि न भवति बिस्तादीनां परिमाणवाचित्वात्प्रतिषेधो विधेयः ॥ ० ॥

२०

बहुव्रीहेः ऊधस इति ऊधसोऽनङ् इति समासान्तप्रकरणे सूत्रमकृत्वा बहुव्रीहेरूधसो ङीष् न स्त्रियामिति वक्तव्यं तत्रालोन्त्यस्येत्यन्त्यस्य नकारो ङीष्प्रत्ययश्च स्त्रियां भवतीत्यर्थो भवति धनुषोऽनङ् इति समासान्ते सुपठितस्य समेवं च महोधाः पर्जन्यः कुण्डोध्नी धेनुः किमित्यनङ् न भवति नवेति समासान्तप्रकरण एव ऊधसोऽनङ् स्त्रियामिति वक्तव्यं न

बहुव्रीहेः ऊधसो नकारो लिङ्गाधिकारे। ऊधसो नकारो लिङ्गाधिकारे वक्तव्यः इह मा भूत् महोधाः पर्जन्य इति न वा समासान्ताधिकारे स्त्रीग्रहणात्। न वा लिङ्गाधिकारे नकारः कर्तव्यः किं कारणं समासान्ताधिकारे स्त्रीग्रहणात् समासान्ताधिकार एव स्त्रीग्रहणं कर्तव्यं इतरथा हि कब्विधिप्रसङ्गः इतरथा हि कब्विधिः प्रसज्येत कस्यां पुनरवस्थायां कप् प्राप्नोति प्राक् ङीषुत्पत्तेः प्राक् तावन्न प्राप्नोति किं कारणं न हि ङीषि भाषा। उत्पन्ने न हि ङीषि प्राप्नोति उत्पन्ने चापि न भवितव्यं किं कारणं नद्यन्तानां योऽयं बहुव्रीहिरिसेवं सः। न चैष नद्यन्तानां बहुव्रीहिः प्रागेव तर्हि प्राप्नोति ननु चोक्तं न हि ङीषि विभाषेति। यद्यपि न ङीषि विभाषा। कप् तु विभाषा। कपो वकाशः अन्यो बहुव्रीहिः अयवकः अव्रीहिकः। ङीषो वकाशः। विभाषा कप् यदा न कप् सो वकाशः कुण्डोध्नी घटोध्नी। कप्प्रसङ्गे उभयं प्राप्नोति परत्वात् कप् स्यात् तस्मात् सुष्ठूच्यते।

।। न वा समासान्ताधिकारे स्त्रीग्रहणादितरथा हि कब्विधिप्रसङ्ग इति।। ।। ।।

नैवं वा वक्ष्यं कर्तव्यं कप् समासान्तनिवृत्त्यर्थमित्यर्थः कस्यां पुनरिति द्वावत्र कपौ नदीलक्षणो नित्यः शेषलक्षणो विकल्पितश्चात्र कस्य प्रसङ्ग इति प्रश्नः प्रागिति शेषलक्षण इत्यर्थः। न हि ङीषीति यत्र कप् स्यात् ङीपु विधानमनवकाशं स्यादिति भावः द्वयोस्तु विकल्पे सति परस्परपरिहारेण प्रवर्तनेनान्यास्ति ङी

।। षोऽनवकाशत्वं उत्पन्न इति नदीलक्षण इत्यर्थः।। ।। ।।

दामहायनांताच्च संख्यादेरिति संख्याव्ययोर्द्वंद्वनिर्दिष्टयोरेकदेशानुवृत्तिरलभ्येतिभावः चेतनावत इति लोकव्यवहार उत्क्रमणादौ चेतनस्यैव कर्तृत्वेन प्रसिद्धत्वात्। नहि घट उत्क्रामतीति प्रसिद्धिरितिभावः अचेतनेष्वपीति देशांतरप्राप्तिरचेतनानामपि दृश्यत इत्यर्थः। एकयोगेति शब्दानुमानपक्षे

दामहाय दामहायनांतात्संख्यादेरितिवक्तव्यं इहमाभूत उद्दामावडवेति तत्पुरुषविज्ञानाद्धासिद्धं बहुव्रीहेरितिवर्त्तते तत्पुरुषश्चायं। उत्क्रांतादाम्नः उद्दामेति भवेत्सिद्धं कथं तत्पुरुषः यदा तु खलु बहुव्रीहिः तदा न सिध्यति उत्क्रांतं दामास्या इति ननु च चेतनावत एतद्भवति उत्क्रमणं वा अपक्रमणं वा दाम चाचेतनं अचेतनेष्वपि चेतनवदुपचारो दृश्यते तद्यथा स्वस्तान्यस्याः बंधनानि स्वसंते चास्याः बंधनानीति तत्र्हि संख्यादेरितिवक्तव्यं न वक्तव्यं प्रकृतमनुवर्त्तते क्व प्रकृतं संख्याव्ययादेर्ङीबिति। यदि तदनुवर्त्तते अव्ययादेरपि प्राप्नोति नैष दोषः संख्यादेरित्यनुवर्त्तते अव्ययादेरिति निवृत्तं कथं पुनरेकयोगनिर्दिष्टयोरेकदेशोनुवर्त्तते एकदेशोन एकयोगनिर्दिष्टानामप्येकदेशानुवृत्तिर्भवति तद्यथा। पाकमूलेपील्वादिकर्णादिभ्यः कुणब्जाहचौ। पक्षात्तिरित्यत्र मूल इत्यनुवर्त्तते। पाक इति वृत्तं अथेह कथं भवितव्यं द्विहायनी अस्याः शालायाः द्विहायना त्रिहायनेति हायनो वयसि स्मृतः वयोवाचिनो हायनशब्दस्य ग्रहणं नचैष वयोवाची अथ णत्वं कस्मान्न भवति णत्वमपि वयोवाचिन एव केवलमामक। मामकग्रहणं किमर्थं न अणंता
इति सिद्धं नियमार्थोयमारंभः मामकशब्दात् संज्ञाछंदसोरेव ङीप्मा भूत्॥ ॥ ॥

यस्यैव शब्दस्य स्वरितत्वं प्रतिज्ञायते स एवानुवर्त्तते अर्थानुमानपक्षे तु द्वंद्वार्थस्यैकत्वादनुवृत्तिः स्यात् हायन इति वक्तव्यमेतदितिभावः णत्वमपीति त्रिचतुर्भ्यां हायनस्येति विहितं केवलं ॥ श्री ॥ श्री ॥७॥ ॥

मामिकेति ममेयमितियुष्मदस्मदोरन्यतरस्यां खञ्चेत्यण् तवकममकावेकवचने इति ममकादेशः टाप् मामकनरकयोरुपसंख्यानमितीत्वं अंतर्वत् अं
तर्वदिति अंतर्वत्नी गर्भिणी। पतिवत्नी जीवत्भर्तृकेत्यर्थः किंपुनरिति अंतर्वत्नीति नुगभाव एव प्रत्युदाहार्य इति मन्यते नचात्रेति अंतः शब्दस्याधिकर
णप्रधानत्वादितिभावः वाचेति मतुब्वत्वे नुनित्यमवतः पत्युर्नो इयमस्यपत्नीति यज्ञसंयोग इति पतिशब्दस्य विशेषणं मन्यते। तेन यत्र यज्वत्वा चि

मामिकावुद्धिरिति रात्रेश्च अजसादिष्विति वक्तव्यं इहापि यथा स्यात् रात्रिं रात्रिं स्मरिष्यंतः रात्रिं रात्रिमजानंतः सर्वां रात्रिं सहोवि
लाप स्याएकाविरात्रिकां अंतर्वत्स। अंतर्वत्पतिवदिति गर्भभर्तृसंयोगे अंतर्वत्पतिवदिति गर्भभर्तृसंयोग इति वक्तव्यं इह माभूत् प्र
यतेत्वया पतिमती पृथिवी इति अथांतः शब्दस्य गर्भसंयोगे किं प्रत्युदाह्रियते अंतरस्यां शालायामस्तीति किंपुनः कारणं वाक्यमेव प्रत्युदाह्रियते न
पुनर्मतुप् अस्तिसामानाधिकरण्ये मतुब्विधीयते नचात्रास्तिना सामानाधिकरण्यं इहापि नर्हि न प्राप्नोति अंतर्वत्नीति एवं तर्हि अंतर्वत्सति
वतो नुक् मतुब्वत्वे निपात्यते अंतर्वदिति मतुप् निपात्यते वत्वं सिद्धं पतिवदिति वत्वं निपात्यते॥ मतुप् प्रसिद्धः किमविशेषेणान्ते साह गर्भिण्यां जी
वपत्यां च एतस्मिन्विषये वा च छंदसि नुग्भवेत वा च छंदसि नुग्वक्तव्यः सांतर्वत्नी देवानुपैत् सांतर्वत्नी देवानुपैत् पतिवत्नी तरुणवत्सा पतिवत्नी तरु
णवत्सा पत्युर्नो यज्ञसंयोगे इत्युच्यते तत्रेदं न सिध्यति इयमस्य पत्नी। कथं तर्हि स्यात् पत्नीसंयाजैरिति यत्र यज्ञसंयोगः नैष दोषः पतिशब्दोयमैश्वर्यवा
ची सर्वेण गृहस्थेन पंचमहायज्ञा निर्वर्त्याः यज्ञादः सायंप्रातर्होमं चरुपुरोडाशांश्च निर्वर्त्तयति तस्या सावीष्टे एवमपि तुषजकस्य पत्नी न सिध्यति।

समवधाने पतिशब्दः प्रयुज्यते पत्नीसंयाजा इत्यादौ। तत्रैव नत्वेन भाव्यमिति भावः पतिशब्दोयमिति पतिशब्दार्थस्य यज्ञसंयोग इति विशेषणं। पत्न्याश्च दंप
तोः सहाधिकाराद्यज्ञेधिकारात् कर्त्तृत्वात्तत्फलसंबंधाद्यज्ञसंयोगः तुषजकस्येति त्रैवर्णिकानामेव सभार्याणां यज्ञेधिकारो न शूद्रस्य॥ ॥

पा॰ कौ॰ ४
२५

उपमानादिति अग्निसाक्षिपूर्वकपाणिग्रहणाश्रयादिति भावः विभाषा स॰ सहशब्देन विद्यमानवचनो विद्यमानपूर्वः सपूर्वः न तु सपुत्र आगत इत्यादिवत् तुल्ययोगे सहशब्देन हि पूर्वस्य न कारणं देशं दृष्यते। तत्र पतिशब्दविशेषणं सपूर्वग्रहणमिति मत्वाह पत्युरिति उपसर्जनसमास इति सर्वोपसर्जने बहुव्रीहावित्यर्थः आशापतिरिति आशायाः पतिरिति षष्ठीसमासः प्रातिपदिकविशेषणत्वादिति प्रातिपदिकं पतिशब्देन विशेष्यते तत्तदेवानुपसर्जनग्रहणेन ▬▬▬

र्यूनः छात्राः श्वाशुराः। यत्र एव कुलस्यापत्यं कुलीनः कुलीनस्यापत्यं कौलीनिः कौलीनेर्यूनः छात्राः कौलीनाः। एवं छ स्वसुरपत्यं स्वस्रीयः स्वस्री
यस्यापत्यं स्वास्रीयिः स्वास्रीयेर्यूनः छात्राः स्वास्रीयाः। एतान्यपि हि नसंति प्रयोजनानि। [illegible]
[illegible] अत्रापि यूनि श्वशुर्यः कुलीनः स्वस्रीयः इत्येव भवितव्यं उक्तमेतत् अत्रा[illegible]
कि अब्राह्मणगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानमिति अब्राह्मणगोत्रमात्रादिति उच्यते नचैतदब्राह्मणगोत्रमात्रं अब्राह्मणगोत्र
मात्रादिति नायं पर्युदासः यदन्यदब्राह्मणगोत्रमात्रादिति। किं तर्हि प्रसज्यप्रतिषेधोयं ब्राह्मणगोत्रमात्रान्नेति अपरिपठितदेवं विज्ञेयं

गम्यमानमप्रवर्तते कुलीन इति कुलात् खः स्वस्रीय इति स्वसुश्छः एतान्यपीति लक्षणांतरेण युवप्रत्ययस्य लुकः सिद्धत्वादित्यर्थः नचैतदिति अब्राह्मण
शब्देन ब्राह्मणसदृशक्षत्रियादिग्रहणं चन्द्रमुसादिशब्दे [illegible] क्षत्रियादेरनभिधानादित्यर्थः प्रसज्यप्रतिषेध इति युवप्रत्ययमात्रस्य लुकं विधाय ब्राह्मणगो
त्रात्परस्य तन्निषिध्यत इत्यर्थः मायूरीति मयूरस्यापत्यमिति विगृह्य गोत्रे इञ् तदंताद्यूनि यञिञोश्चेति फक् तस्य लुक्।। ।। ।।

ए०म०
५१

ग्लुचुकायनेरिति ग्लुचुकस्यापत्यं गोत्रमिति प्राचामवृद्धात्फिन्बहुलमिति फिन्। ततो यूनि अण्। तस्य लुक् गोत्रे भवति। अन्यथा वृद्धत्वाच्छः स्यात्। कापिंजलादेरिति कपिंजलस्यापत्यमत इञ्। ततो यूनि कुर्वादिभ्यो ण्यः इति ण्यः। तस्य लुक् गोत्रे अस्य एव स्यात्। अन्यथा छः स्यात्। प्राग्दीव्यत इति प्राग्दीव्यतो येऽर्थास्तेषु विवक्षितेष्वित्यर्थः। वृद्धवदिति गोत्रवदित्यर्थः। अन्यथा गोत्रसंज्ञाया युवसंज्ञया बाधितत्वात् गोत्राश्रयकार्याप्रसंगः। गार्ग्यायणानामिति

एवं तत्र्येण त्वौ सर्वे त्र प्रयोजनं अण् ग्लुचुकायनेरपत्यं माणवकः ग्लौचुकायनः ग्लौचुकायनस्य यूनः छात्राः ग्लौचुकायनाः एवं काapिंजलाद्यर्थे कापिंजलादेरपत्यं माणवकः कापिंजलाद्यः तस्य यूनः छात्राः कापिंजलादाः प्राग्दीव्यतोऽधिकारे यूनो वृद्धवदिति देशः। प्राग्दीव्यतोऽधिकारे यूनो वृद्धवदतिदेशः क्रियते। युवा वृद्धवद्भवतीति वक्तव्यं किं प्रयोजनं गार्ग्यायणानां समूहः गार्ग्यायणकं गार्ग्यायणानां किंचित् गार्ग्यायणकं। गार्ग्यायणो भक्तिरस्य गार्ग्यायणकः गोत्राश्रयो वुञ् यथा स्यात्॥ यदि वृद्धवदिति देशः क्रियते औपगवेर्यूनः छात्रा औपगवीया इति। इञो गोत्रे इत्यण् प्राप्नोति यदि पुनर्युवा वृद्धवदित्यनेनानुवृत्तिरतिदिश्येत कथं तु नर्युवा वृद्धवदित्यनेनानुवृत्तिः प्राक्प्रत्ययानि देशं वतिनिर्देशोऽयं कामचारश्च वतिनिर्देशवाक्यशेषं समर्थयितुं तद्यथा उशीनरवन्मद्रेषु यवाः संतिन संतीति मातृवदस्याः कलाः संतिन संतीति एवमिहापि युवा वृद्धवद्भवति। वृद्धवन्न भवतीति॥ ॥

गर्गस्यापत्यं गोत्रं गार्ग्यो दिम्भ्यो यञ्। ततः तद्युनि यञिञोश्चेति फक्। ततः तस्य समूहे गोत्रोक्षोष्ट्रोरभ्रेति वुञ्। इदमर्थे गोत्रचरणाद्वुञिति वुञ्। सास्य भक्तिरित्यर्थे गोत्रक्षत्रियाख्येभ्यो बहुलं वुञिति वुञ्। औपगवेरिति तस्यापत्ये यूनि लुगिरस्य प्रसंगात्। नादिञोलुगभावाद्वृद्धवदतिदेशात् इञश्चेत्यण्प्रसंगः एतद्दोषपरिहारायाह यदि पुनरिति यथा गोत्रे युवप्रत्ययो नोत्पद्यते तेन यथा यून्यपि प्राग्दीव्यतीयार्थविवक्षायां युवप्रत्ययस्यानुत्पादादिञभावा

एवं वाक्यशेषमिति उभयसंभवेन भवतीत्यध्याहरिष्यत इत्यर्थः एवमित्यनेनानन्तरप्रक्रान्तो न भवतीति वाक्यशेषः परामृश्यते तदुक्तमित्यत्र गोरवं स्यादिति भावः अथ वै तर्हीति एवं सतीत्यर्थः एतेन गौरवं परिहृतं कथमिति यूनि लुगित्यस्मिन्क्रियते फक्फिञोरन्यतरस्यामित्यतः फिनः विधेयकार्याणि दृष्टानि तत्र गार्ग्यायणस्य छात्रा गार्गीयाः गार्ग्यायणीया इति रूपद्वयं न सिध्यतीति भावः फक्फिञ्ज्वर्तीति वर्तनं वर्तः फक्फिञोर्वर्तः सविद्यतेयस्मि

एवं वाक्यशेषं समर्थयिष्यामहे यथा गोत्रे युवप्रत्ययो न भवति एवं प्राग्दीव्यतोऽधिकारे यूनः पि न भवतीति तदुक्तं यद्यप्येत
दुच्यते अथ वै तर्हि यूनि लुगित्येतन्न क्रियते कथं तर्हि फक्फिञोरन्यतरस्यामिति फक्फिञ्ज्वर्ती युवा वा द्वन्द्व इवतीति वक्ष्यामि य
दा तर्हि न वृद्धवत्तदा गार्ग्यायणानां समूहः गार्ग्यायणकं गार्ग्यायणानां किं चिद्गार्ग्यायणकं गार्ग्यायणो भक्तिरस्य गार्ग्यायणकं गो
त्राश्रयो वुञ्न प्राप्नोति यदि पुनर्युवा वृद्धवदिसनेनार्थः तिदिष्यते प्राग्दीव्यतोऽधिकारे यूनो वृद्धवदर्थो भवतीति तत्र वक्तव्यं यद्यप्ये
त दुच्यते॥ अथ वै तर्हि यूनि लुगित्येतन्न करिष्यते कथं फक्फिञोरन्यतरस्यामिति। फक्फिञ्ज्वर्ती युवार्थो वा वृद्धवद्भवतीति वक्ष्यामि यदा तर्हि
न वृद्धवत्तदा गार्ग्यायणानां समूहो गार्ग्यायणकं गार्ग्यायणानां किं चिद्गार्ग्यायणकं॥ श्री ॥ ॥

यूनि स वा वृद्धवत्ता ततः पक्षे फक्फिञोरत्यन्तं पक्षेऽनुसन्निरिति द्वैरूप्यसिद्धिः यदा तर्हीति गार्ग्यायणानां समूह इति विवक्षायां यदा वृद्धवदतिदेशास्य
कोऽनुसन्तिस्तदा गार्ग्यकमिति सिध्यति यस्मिंस्तु पक्षे वृद्धवदतिदेशाभावात् फक्श्रवणं तत्र गोत्रलक्षणो वुञ्न प्राप्नोति इदानीमर्थातिदेशदर्शनायाह यदि पुनरिति यूनि लुगित्येतदित्यूनो गोत्रत्वातिदेशाद्युवप्रत्ययस्याभावाल्लुङ् विधेय इत्यर्थः॥ ॥ ॥

=गोत्रतातिदेशादिति तत्रातिदेशे च गोत्रे एक एवेति नियमेन युवप्रत्ययानुसन्तिरिति लुक् विधेयोऽतिदिश्यमानधर्मविकृत्स्याश्रयाभाव अतिदेशस्य वासिद्ध इति भावः॥१=

=नतु राजभ्रष्टुराघत्समोर्जताविसान्यामनंतरापत्ये पिप्रत्यये नतस्यगोमतानावान्तत्र युञोशपोनत्रापकतेन नतस्य चादिनार्थात्कथं ज्ञापकत्वमत आह प्रागिति तथा चानंतरापत्ये राजन्यः श्वशुर्य इत्यादयः समभिधाने प्राणायन्निवडुपरात्रे प्रागादिति भावः ॥१=

यद्यमिति प्राक् गोत्रसंज्ञाया गोत्रे कुंजादिभ्य इत्यतो गोत्रग्रहणानुवर्तनाच्छास्त्रीयगोत्राभिधायिनो राजन्यमनुष्यशब्दौ तत्र युञ्गोत्रग्रहणेनैव ताभ्यां वुञः सिद्धत्वात् किं तयोर्ग्रहणेन न च ग्रहीतौ नु ज्ञापयतो गोत्रग्रहणं लौकिकगोत्रपरमिति । राजन्यमनुष्यशब्दौ च लौकिके प्रयोजातिविशेषवाचित्वाल्लौकिकगोत्राभिधायिनौ न भवत इति कृत्स्नं तयोर्ग्रहणं । लौकिकं चागोत्रमपत्यमात्रं परमिति अपत्याधिकारादन्यत्रेत्यर्थः उपचर्यत इति व्यवह्रियत इत्यर्थः शालंकेरिति शालंकी रपत्यमिति वाक्यादेणहुतिगणत्वादिञ् । पैलादिषु शालंकिशब्दपाठान्निपातनाच्छलंकादेशः अत एव च निपातनाज्जोत्रेपि न शालंकि

गार्ग्यायणो भक्तिरस्य गार्ग्यायणकः गोत्राश्रयो वुञ् प्राप्नोति । एवं तर्हि राजन्यादुञ् मनुष्याच्च ज्ञापकं लौकिकं परं यद्ययं वुञ्विधौ राजन्यमनुष्ययोर्ग्रहणं करोति ततज्ज्ञापयसाचार्यः लौकिकं परं गोत्रग्रहणमिति युवा च लोके गोत्रमित्युपचर्यते किं गोत्रोसि माणवक गार्ग्यायणः ॥ किं गोत्रोसि माणवक वात्स्यायनः यद्येतत् ज्ञाप्यते । औपगवेरपत्यं छात्रा औपगवीयाः गोत्राश्रय इञो गोत्र इत्यणप्राप्नोति सामूहिके वुञ् ज्ञापकं यदि सामूहिके वुञ् ज्ञापकं गार्ग्यायणानां किंचित् गार्ग्यायणकं गार्ग्यायणो भक्तिरस्य गार्ग्यायणकः गोत्राश्रयो वुञ् प्राप्नोति । वुञ्विधौ ज्ञापकं यदि वुञ्विधौ ज्ञापकं शालंकेरपत्यं छात्राः शालंका इञो गोत्र इत्यण् न प्राप्नोति अस्त्वेतद्विशेषेण कथमौपगवेऽपत्ये ? छात्रा औपगवीयाः गोत्रे णोरिवि शेषयिष्यामः गो

फके न बाध्यते ततो वृनिष्कृतस्य पैलादिलाल्लुकि कृते इञ्ते वृनिवर्तेत इति गोत्राश्रय इञ्

त्वण् न प्राप्नोति गोत्रेणो ञमिति कण्वादिभ्यो गोत्र इत्यत्र गोत्रग्रहणोनपौत्रप्रभृति गोत्रं गृह्यते गोत्रप्रत्ययानुवादे न स्यात्तत्र विधीयते । कण्वादिभ्यो गोत्रे यः प्रत्ययो विहितस्तदं तेभ्यो [illegible] णभवतीति कण्वादयश्च गर्गादिषु पठितास्तत्र च गोत्र इति वर्तते अपत्याधिकारे च गोत्रग्रहणादेव शास्त्रीयं गोत्रं गृह्यते तदेव कण्वादिभ्यो गोत्र इत्यत्रानूद्यते । तदेवं वेञ्स्येत्यत्रानुवर्तते तेन गोत्रे य इञ् विहितस्तदंतादविधीयमानः शालंके भविष्यति न त्वौपगवेरित्यर्थः नन्वौपगविशब्दे नेन सूत्रेणाणोलु

भा०कै०४
५३
५५

तस्यापत्यं तस्येदमिति इदमिति संबन्धसामान्यस्य सर्वविशेषान्तर्भावादपत्यस्याप्यन्तर्भूतत्वादित्यर्थः बाधका इति जातौ बहुवचनं। तस्येदमित्यनेन विधी-
यमानस्याणो बाधकश्छस्तस्य बाधनार्थमिदं सूत्रमित्यर्थः कथं पुनरिति एकस्मिन्नर्थे प्राप्तौ सत्यां बाध्यबाधकभावो भवति तत्र शेषेऽर्थे विधीयते छ-
ः अणपत्ये नापत्य इति भिन्नार्थत्वादनयोः कथं बाध्यबाधकभाव इति प्रश्नः उत्सर्ग इति यदि योगविभागमकृत्वा तस्यापत्यमत इञित्युच्येत तत्र
तद्प्रकृतिविशेषसंबन्धस्यैवापत्यार्थस्योपयोगात् प्रकृतिसामान्यसंबद्धोऽपत्यार्थः शेष एव स्यादिति स्यादेव वृद्धाच्छः। पृथग्योगे त्वपत्यार्थस्याण्

तस्या तस्येदमित्यपत्येऽपि तस्येदमित्यपत्येऽप्यण् सिद्धः तस्येदंविशेषा ह्येते अपत्यं समूहो विकारो निवास इति। किमर्थं तर्हीदमुच्यते बाधनार्थं
कृतं भवेत् ये तस्य बाधकास्तद्बाधनार्थं। कथं पुनरशैषिकः शैषिकं बाधेत उत्सर्गः शेषो वाऽसौ योऽप्युत्सर्गः सोऽपि शेष एव अपत्ये तस्मिन्बाध-
कबाधनार्थे सति किं प्रयोजनं। वृद्धाच्छस्य प्रयोजनं वृद्धाच्छं प्रयोजयन्ति भानोरपत्यं भानवः श्यामगोरपत्यं श्यामगवः कथं पुनरिछताप्यप-
वादः प्राप्नुवंछ क्वो बाधितुं तस्यग्रहणसामर्थ्यात् किमिदं भवानध्याहृत्य तस्यग्रहणस्यैव प्रयोजनमाह। न पुनः सर्वस्यैव योगस्य। अथवा अर्थं
तूत्तरार्थमर्थनिर्देशः कर्तव्यः समर्थविभक्तिरपि तस्यैवमप्युत्तरार्था प्रतिनिर्दिष्टव्या ॥ ॥ ॥ ॥

द्विविधावुपयोगाच्छप्रत्ययाभावाच्छस्याप्राप्तिरिति सैव बाधः कथ्यते उत्सर्ग इति प्रकृतिसामान्यसंबद्धः सामान्यभूतोऽपत्यार्थ उक्तः अपत्ये इदमिति सामान्यभूतोऽर्थ उत्स-
र्गस्तदन्तर्भावादस्मिन्पृथग्योगेऽपत्यार्थ उत्सर्गः शेष एव भवति अननुप्रयुक्तत्वादित्यर्थः कथं पुनरिति प्रकृतिसामान्याद्विधानादणोऽत्सर्गः। प्रकृतिविशेषा-
दुविधानाच्छोऽपवाद इति मत्वा प्रश्नः तस्यग्रहणसामर्थ्यादिति एकदेशे सूत्रे लक्ष्यते तेन पृथक्सूत्रारंभादित्यर्थः पृथक्सूत्रे ह्यपत्यार्थस्याशेषत्वाभावाच्छ-
स्याभावः॥ इतरेषां तातामिप्राय आह किमिदमिति अध्याहृत्येति तत्रैव तात्पर्यं कृत्वेत्यर्थः ॥ ॥

एम०
५३

=कामचारादिति॥ एवं स्त्रीवद्भिरिति स्त्रीपुंसयोर्न स्यादिति बोध्यं॥ यद्यपि नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामिति तथापि वास्तवमेव समाधिं वक्तुमेतन्नाहतं॥=

सिद्धान्तवादी स्वाभिप्रायं दर्शयितुमाह एवं तर्हीति पुंल्लिंगेनेति यद्यपि नपुंसकेऽपि तत्स्यादिति रूपं भवति तथापि पुंनपुंसकयोर्युगपन्निर्देशसम्भवात् नुमः शक्यत्वात् कामचारादेवमुक्तं स्त्रीनपुंसकलिंगादिति सुमातुः पत्यं सौमात्रः क्षत्रस्यापत्यं क्षात्रिरित्यादौ विग्रहार्थे तद्धितार्थे निर्देश इति तद्धितप्रकरणादेवमुक्तं। सर्वेनैव हि शा

× नबहुवचर

एवं तर्हि योगविभागकरणसामर्थ्यात् इतरथा हि तस्यापत्यमतदुन्मवतीमेव ब्रूयात् पुंल्लिंगेनायं निर्देशः क्रियते एकवचनान्तेन च तेन पुंल्लिंगादेवोत्पत्तिः स्यात् एकवचनान्ताच्च स्त्रीनपुंसकलिंगाद्द्विवचनान्ताच्चेदं न स्यात्॥ तद्धितार्थे निर्देशे लिंगवचनमप्रमाणं तस्याविवक्षितत्वात् तद्धितार्थनिर्देशे लिंगवचनमप्रमाणं किं कारणं तस्याविवक्षितत्वात् नात्र निर्देशस्तन्त्रं कथं पुनस्तेनैव च नाम निर्देशः क्रियते तच्चातन्त्रं स्यात् तत्कारी च भवांस्तद्द्वेषी च नान्तरीयकत्वादत्र पुंल्लिंगेन निर्देशः क्रियते एकवचनान्तेन च अवश्यं कयाचिद्विभक्त्या केनचिच्च वचनेन निर्देशः कर्तव्यः तद्यथा कश्चिदन्नार्थी शालिकलापं सतुषं सपलालमाहरति नान्तरीयकत्वात् स यावदादेयं तावदादाय तुषपलालान्युत्सृजति तथा कश्चिन्मांसार्थी मत्स्यान् सशकलान् सकण्टकानाहरति नान्तरीयकत्वात् स यावदादेयं तावदादाय शकलकण्टकानुत्सृजति। एवमिहापि नान्तरीयकत्वात्पुंल्लिंगेन निर्देशः क्रियते एकवचनान्तेन च न त्वत्र निर्देशस्तन्त्रं सर्वनाम निर्देशे वि

शेषासंप्रत्ययः॥ ०॥

सूत्रेऽस्मिन्नान्तरीयकत्वादुपात्ते लिंगसंख्ये च न विवक्ष्यते। क्वचित्संख्यानुविवक्ष्यते। यथा सुप्सुपेति अप्रमाणमिति तद्वशात्कार्यस्य विधिनिषेधौ न भवत इत्यर्थः भावसूत्रे विस्तरेण भाष्यमेतद्व्याख्यातमिति तत एवावधार्यं॥ ॥ श्री ॥

भा०कै०४
५४

सामान्यनिर्देशादिति तस्येति निर्देशात्तच्छब्दादेव सामान्यवाचिनः प्रत्ययः स्यान्नोपग्वादिभ्य इत्यर्थः सामान्यचोदनाइति विशेषाणामेव कार्यसिद्ध्यर्थं
सामान्यमुपादीयते न तु स्वार्थमित्यर्थः इदमपीति उपसंनिधानेनैव संबंधित्वावृत्तादपत्यवन्मात्रस्याक्षेपात्सामान्येनापत्यस्य विशेषणविशेष्य

सामान्यनिर्देशात् सर्वनामनिर्देशे विशेषस्यासंप्रत्ययः किंकारणं सामान्यनिर्देशात् सर्वनाम्नायं निर्देशः क्रियते सर्वनाम च सामा
न्यवाचि तेन सामान्यवाचिन एवोत्पत्तिः स्यात् विशेषवाचिनो न स्यात् सामान्यचोदनास्तु विशेषेषु सामान्यचोदनास्तु विशेष्ववतिष्ठं
न्ते तद्यथा गौरनुबंध्यो ऽजो ऽग्नीषोमीय इति आकृतौ चोदितायां द्रव्ये आरंभणालंभनप्रोक्षणविशसनादीनि क्रियन्ते विषम
उपन्यासः अस्ति कारणं येनैतदेवं भवति किंकारणं असंभवात् आकृतावारंभणादीनां संभवो नास्तीति कृत्वा आकृतिसहचरिते द्रव्ये आ
रंभणादीनि क्रियन्ते इदमप्येवंजातीयकमेव असंभवात्सामान्यवाचिन उत्पत्तौ विशेषवाचिन उत्पत्तिर्भविष्यति। अपत्याभिधाने स्त्री
पुंल्लिंगस्याप्रसिद्धिर्नपुंसकत्वात् अपत्याभिधाने स्त्रीपुंल्लिंगस्याप्रसिद्धिः किंकारणं नपुंसकलिंगत्वात् अपत्यं नपुंसकलिंगं। तेन
नपुंसकलिंगस्यैवाभिधानं स्यात् स्त्रीपुंल्लिंगस्य न स्यात् ननु चेदं पुरस्तादेव चोदितं परिहृतं च इह पुनरुत्सन्नेनाभिधानं चोद्यते सि
द्धं तु प्रजनस्याविवक्षितत्वात् सिद्धमेतत् कथं प्रजनस्याविवक्षितत्वात्। प्रजनो ऽत्राविवक्षितः ॥×उत्सन्नित्वत्रचोद्यते× ॥ ॥

मावायोगादिहापि सामान्येन विशेषाएव गृह्यन्ते। यद्यत्तु प्रकरणवशाद्विशेषे सर्वनाम वर्तेत तेन दातस्मादपि प्रत्ययो भवति तदायनिरिति नपुंसकलिंगस्येति औ
पगवमित्यनेनैवापत्यस्याभिधानं स्यात् औपगव औपगवीत्येवं न स्यादित्यर्थः प्रजन इति प्रसवमात्रं विवक्षितं न तु लिंगसंयोगो ऽपीत्यर्थः ॥ ॥

राम०
५४

=उत्सन्नित्वत्रेति भाष्येनत्र यथा पुंल्लिंगादेवोत्पत्तिरश्वादिना तथा प्रकृते नपुंसके वाच्य एवोत्पत्तिः स्यादिति न चोद्यते किं तु नपुंसकत्वे [illegible] =नापत्यनिवेति [illegible] चांव [illegible] इति किं [illegible]
[illegible] पुंस्त्वादिवैशिष्ट्येनापीति चोद्यत इत्यर्थः ॥ २ =

सचेति संततिरपत्यं प्रसव इति सर्वलिंगस्य शब्दैरभिधीयमानस्य दर्शनादित्यर्थः समानायामिति एकस्मिन्नर्थे इत्यर्थः अपत्यमिति अपत्यशब्दप्रसाध्यमा
नमित्यर्थः प्रजन इति सर्वलिंगैः शब्दैः प्रसाध्यमानत्वात्सर्वलिंग इत्युच्यते एकार्थ इति एकोऽर्थः सर्वलिंगः सच केनचिच्छब्देन प्रसाध्यमानः केनचिदेवलिंगेन यु
क्तः प्रतीयते अवयवान्यत्वादिति स्वार्थिकस्यापि [illegible] प्रत्ययस्योत्पत्तौ भिन्नावयव
त्वाद्भिन्नशब्दप्रसाध्यमानत्वादेकस्यैवार्थस्य लिंगभेदो वगम्यते किं पुनरत्यंतभिन्नशब्दप्रसाध्यमानस्य लिंगभेदावगतिर्नस्यादित्यर्थः एको गोत्रे ए

सच सर्वलिंगः। किं पुनः कारणं समानायां प्रवृत्तौ अपत्यं नपुंसकलिंगं प्रजनः सर्वलिंगः एकार्थे शब्दान्यत्वाद्दृष्टं लिंगान्यत्वं एकार्थेश
ब्दान्यत्वाल्लिंगान्यत्वं दृश्यते तद्यथा पुष्यस्तारकानक्षत्रं गेहं कुटीमठ इति अवयवान्यत्वाच्च अवयवान्यत्वाच्च लिंगान्यत्वं दृश्यते त
द्यथा कुटी कुटीरः शमी शमीरः शुण्डा शुण्डारः अवयवान्यत्वात्किल लिंगान्यत्वं स्यात् किं पुनर्येत्र शब्दान्यत्वमपि एको गोत्रे किमर्थ
मिदमुच्यते॥ ॥ श्री ॥

कश्चायमस्य प्रधानासहायसंख्या प्रथमसमानवाची इह तु संख्यावाची प्रथमवाची वा गृह्यत इत्येव निर्णयो पर्यंतरासंभवात् किमर्थमिति क्रियमाणे
ऽपि सूत्रद्वये सर्वमिष्टं न सिध्यतीति प्रश्नः इह पौत्रप्रभृतौ अपत्ये विवक्षिते मूलप्रकृतेरेव गर्गादेः प्रत्यय इष्यते न त्वनंतरापत्यवाचिनो गार्ग्यप्रभृतेर्नो
ऽपि गोत्रप्रत्ययांता गार्ग्यप्रभृतेः। यूनि तु गोत्रप्रत्ययांतादेवेष्यते न तु मूलप्रकृतेः सांतरयुवप्रत्ययः स्त्रियां तु युवकार्यं नेष्यते अपि तु गोत्रकार्यमेव एतत्सर्व
मेतस्मात्सूत्रद्वयाद्यथा न सिध्यति तथा क्रमेण वक्ष्यते॥ श्री ॥७॥ ॥

विवक्षित इति। किं तु शेषत्वेनेत्यर्थः। तथा सत्युक्तप्रयोगाद्विति नियमात्कर्तरि षष्ठी न स्यादिति भावः। ३ = तल्लपीति। यथा मातुः स्मरतीत्यादौ ॥ =

वार्तिककारः प्रयोजनं तावद्दाघसत्सूत्रस्यरूपयितुमाह उत्पादयितारमिति प्रति शब्दोल्लक्षणेवाक्यकारेण प्रयुक्तः उत्पादयितुः सामान्यविवक्षया च द्विवचनेनाकारि भाष्यकारेण तु भेदविवक्षयावी प्सामाश्रित्य द्विवचनं कृतं अपत्ययोगादिति अपत्यस्य योग इति तत्र षष्ठी समासः उत्पादयिता चात्र तत्कर्मत्वेन विवक्षितः किं तर्हि प्रति शब्दयोगविवक्षायां कर्मप्रवचनीययुक्ते द्वितीयेति द्वितीया यथा निर्दिष्टः। अपत्योपपदविभक्तेः कारकविभक्तिर्बलीयसीति कर्मणि कृद्योगषष्ठी स्यात् तस्य चेति तत्र पर्यायो यदा लोकेन विवक्ष्यते तदा नासौ शब्दसंस्कारनिमित्तं भवति अपत्येन योगस्तु लोके उत्पादयितुरेव विवक्षि
त
उत्पादयितारं प्रत्यर्थे योगात्तस्य च विवक्षितत्वादेकवचनं गोत्रे उत्पादयितोत्पादयितापत्येन युज्यते तस्य च विवक्षितत्वात् उत्पादयितुः सचाभिसंबंधो विवक्षितः उत्पादयितारं प्रत्यपत्ययोगात् तस्य चाभिसंबंधस्य विवक्षितत्वात् उत्पादयितुरुत्पादयितुरपत्याभिधाने नेकप्रत्ययः प्राप्नोति इष्यते चैकएव स्यादिति तद्यो तरेणापत्यं न सिध्यतीति एकवचनं गोत्रे एवमर्थमिदमुच्यते कथं पुनस्तोयते उत्पादयितोत्पादयितापत्येन युज्यत इति एवं हि दृश्यते लोके पितामहस्योत्संगे दारकमासीनं कश्चित्पृच्छति। कस्यायमिति। स आह। देवदत्तस्यापत्यं देवदत्तस्यवेति। उत्पादयितारमपदिशन्ति॥ नात्मानं ॥ ॥

तदिति तन्निमित्तानेकप्रत्ययप्रसंग इत्यर्थः एकवचनमिति एकस्य प्रत्ययस्य प्रतिपादनमित्यर्थः यावंत्य पत्यानि तावतां प्रत्ययानां प्रसंगे सत्येक एव प्रत्ययो यथा स्यादित्येवमर्थमित्यर्थः। गोत्र इति च जात्यपेक्षयैकवचनं तेन गोत्रसमुदाये प्रत्ययसमुदायो निवार्यते कथमिति एकमप्यपत्यं पितृपितामहादीनां सर्वेषां संबंधि भवति तथा चापत्यं पौत्रप्रभृति गोत्रमिति सूत्रकारेण सामानाधिकरण्येन निर्दिष्टः कृत इति प्रश्नः एवं हि दृश्यत इति शब्दार्थसंबंधे लोक एव हार एव प्रमाणं तान्यत्रापि च प्रष्टुः प्रतिवक्तुरुत्पादयितृविषये एव प्रश्नप्रतिवचने इति तत एतदवधार्यत इत्यर्थः अपत्यं पौत्रप्रभृतीति सामानाधिकरण्यं तु

गोत्रस्थानविभागः

राम० ५५

तत्रेति । ऊर्ध्वं तत्रोक्ते प्रयोजनेऽभिमते सूत्रस्यासामर्थ्यान्नापत्यादिति वक्तव्यं अपत्यप्रत्ययान्तादपत्ये प्रत्ययाभावार्थं गोत्र इति यद्येको गोत्र इति गोत्रग्रहणोपादानेन नियमः कृतः तदायं प्रतिषेधो वक्तव्यः । यदि त्वेकोऽपत्य इत्युच्येत तदापत्यप्रत्ययान्तादपत्ये नैवापरः प्रत्ययः स्यात् अपत्यजातावेकस्यैव विधानात् एको गोत्र इति तूच्यमानेऽनन्तरापत्यप्रत्ययान्ताद्गोत्रे प्रत्ययः स्यादेव तुल्यजातीयापेक्षो हि नियमः तेन गोत्रप्रत्यय एवापरो निवार्यते ततश्च गोत्रप्रत्ययान्तादपरो गोत्र[illegible] प्रत्ययो मा भूत् ऊर्ध्वं तदापत्यप्रत्ययान्तान्तु गोत्रे प्रत्ययः स्यादेवेति भावः अथवा यद्यो सार्व्यपि नैवापत्येन युज्यते न तु पितामहादिः

अस्ति प्रयोजनमेतत् किं तर्हीति तत्र प्रत्ययान्ताद्गोत्रे प्रतिषेधो गोत्रे नियतत्वात् तत्र प्रत्ययान्ताद्गोत्रे प्रतिषेधो वक्तव्यः औपगवस्यापत्यमिति किं कारणं गोत्रे नियतत्वात् गोत्रे ह्ययं नियमः क्रियते तेन पश्चात्सीयथा जातीयकस्तु गोत्रे प्रत्ययः प्राप्नोति स एकः स्यात् कश्च प्राप्नोति यः प्रत्ययान्तात् परमप्रकृतेश्चोत्पन्नः परमप्रकृतेश्चोत्पत्तिर्वक्तव्या [illegible]

[illegible] श्री ॥ ७ ॥

एको गोत्र इत्येतच्च नियमार्थं तदा यतोऽनेकप्रत्ययप्रसंगो गोत्राकृतौ विवक्षितायां तस्मादेक एवेति नियम्यते । अपत्यप्रत्ययान्तादेव चक्रमेणापत्यपरंपराविवक्षायामनेकप्रत्ययप्रसंगात् । तत एवैकाम्यनुज्ञानद्वारेणानेकनिवारणं स्यादिति भावः पश्चात्सीयथा जातीयकस्त्विति यत्प्रकृतिरित्यर्थः उभयोपादानं सद्वैविशेष्ययोगप्रतिपत्त्यर्थं परमप्रकृतेरिति गर्गादेरित्यर्थः ॥ ॥श्री ॥ ७ ॥ ॥ ॥

=उपग्वादिभिः तृतीयस्याः पसापत्यदत्सम्बन्धा ...प्रतिपादनात्तस्मादिष्यर्थमित्यर्थः॥३॥=विध्यर्थमिति। एकशब्दः प्रथमवाची। प्रथमः प्रकृतिभूतः। शब्देगोत्रप्रत्ययमुत्पादयतीत्यर्थः॥३॥=नन्वेवमेवप्रत्ययोपिवचनेनविनाऽविष्यतीत्यतआह तासामिति॥४

अप्रयोगादिति उत्पादयितव्येपत्यप्रत्यये गार्ग्यस्यपौत्रादिना अपत्यापत्यवत्सम्बन्धाभावात्प्रत्ययोनप्राप्नोति यद्यपिगर्गादिभ्योयञितिविधानसामर्थ्याद्गर्गादिभ्योगोत्रप्रत्ययाः सिध्यन्तितथापियेऽणादयोऽनन्तरापत्येसावकाशास्तेपरमप्रकृतेरुपग्वादेर्गोत्रेनप्राप्नुवन्तीतिविवक्षितं अप्रयोच्यते एकोगोत्रइत्येतस्य परमप्रकृतेर्विध्यर्थंभविष्यतीतिनियमस्तर्हि नप्रकल्प्येत। ततश्चापत्यसमानाधिकरणप्रत्ययमालाप्रसंगः ननुपरमप्रकृतेः प्रत्ययोत्पत्तावुच्यमानायामपिप्रकृतिप्रत्ययार्थयोः परम्परायोगस्तत्रैवस्यादेवेतिप्रयोगोनस्यात् नैषदोषः परम्परयासंबन्धसद्भावात्प्रयोगोभविष्यति। साक्षात्संबन्धेतुप्रत्ययस्यचरितार्थत्वात्गौणःसंबन्धाश्रयेणोत्पत्तिर्नस्यादितिवक्तव्या इदानीमेतद्दोषद्वयंवक्ष्यमाणेनदोषेणसहपरिहर्तुमाह एतयोश्चेतिचशब्दोवक्ष्य

अप्रयोगादिनप्राप्नोति एतयोश्चैवपरिहारः पठिष्यति त्वाचार्यः यूनिचान्तर्हितेऽप्राप्तिरिति तस्यचयथातत्प्रत्ययान्तंयथातदेवविकारावयवप्रत्ययान्तंद्वितीयंचतृतीयंचविकारंसंक्रामति एवमिहापितदेवापत्यप्रत्ययान्तंद्वितीयंचतृतीयंचापत्यंसंक्रमिष्यति भवेत्सिद्धं औपगवस्यापत्यमौपगवः यत्रसमर्थानन्तरंइष्यते सएवगोत्रे इदंतुखलुनसिध्यति। गार्ग्यस्यापत्यंगार्ग्य इति॥ ॥०॥

मात्रापेक्षया समुच्चयार्थः तत्प्रत्ययान्तमिति त्रितश्चतत्प्रत्ययादित्येतत्सूत्रंप्रत्याख्यायते। योहिकपोतस्यतरवयवस्तद्विकारस्यावयवोविकारोवासोऽभेदोपचारात्कापोतस्याप्यवयवोविकारश्चभवतीतिकापोतएवभविष्यतीतिनार्थोमयडन्तकार्थे त्रितश्चतत्प्रत्ययादित्यनेनसूत्रेण। तत्रयथाकपोतस्यविकारावयवाभ्याममभेदोपचारात्कापोतस्यचेत्युभयत्रयेष्टंसिध्यतितथेहाप्युपग्वौपगवयोरौपगवतदपत्ययोर्वाऽभेदोपचारात्सौत्रप्रभृतिरौपगवशब्देनाभिधास्यते गार्ग्यायणापत्यंचगार्ग्यायणशब्देनेतिदोषत्रयमपिपरिहृतं अपरिहारस्याप्रदर्शयितुमाह॥ भवेदिति॥ ०॥ ॥ ॥

=अनंतरापत्यस्यैकत्वात्तत्रानियमप्रसंगाभावः। गोत्रस्त्रियां त्वेको गोत्र इति नियमादित्यर्थः॥४= तथापीति। वचनसामर्थ्याद्भेदसंबंधाश्रयत्वेऽप्यभेदस्यैव गार्ग्यिरपि स्यादित्यर्थः॥२= =गार्ग्यस्त्रियाः पौत्रवान्नैकात्युवत्वाभिलाषिकोऽबोजमाह। तत्रेति। १=

अत्रत्यस्य इति यदि गार्ग्यो गर्गेण त्वमारोप्यते तदा गार्ग्यैरिव भेदसंबंधस्यानिवृत्तत्वाद्गर्गशब्दवाच्य इति गार्ग्यैरपत्यं गार्ग्यैरेव स्यात्। गार्ग्य एवोच्यते अथ गार्ग्यानन्तरापत्ययोरभे
दाध्यवसायस्तथापि गार्ग्यैरपत्यं गार्ग्यः प्राप्नोति यद्यपि गार्ग्याद्भेदोपन्यास इति वचनसामर्थ्याद्गार्ग्यः स्यात्तथापि गार्ग्यिरपि स्यात्। तस्मादपत्यविषये दोषवानभे
दोपचार इति भेद एवाश्रयणीयः तथा च प्रसर्यानन्तरानिषेधः परमप्रकृतेरत्यन्तविवक्षये तिच्छिन्नमेतत् स्त्रियामेवेति चशब्दो दोषसमुच्चयार्थः तेनानं
तरापत्यस्य स्त्रियां गोत्रस्त्रियां चानियमप्रसंगाभावात्सामर्थ्यात्सौत्रप्रभृतेरपत्यं स्त्रीप्रत्यये युवसंज्ञया गोत्रसंज्ञाया एकसंज्ञाधिकारे द्वन्द्वयुवेति वचना

अत्रत्यस्य अनंतर इत्युच्यते अस्यो गोत्रस्त्रियां चानियमः स्त्रियां च युवसां नियमो न प्राप्नो
ति औपगवीमाणविका। नियमाद्धि स्त्री पर्युदस्यते एको गोत्रे गोत्राद्यून्यस्त्रियामिति॥१०॥

ननु शब्दात्तानियमाद्योऽबाधितत्वात्स्त्रियाः पौत्रप्रभृतेरपत्यस्य गोत्रसंज्ञानास्तीत्येको गोत्र इत्येष नियमो नास्ति अस्त्रियामिति निषेधाद्गोत्राद्यूनीत्यपि
नास्ति नियमस्तथा च स्त्रियां विवक्षितायामनेकप्रत्ययप्रसंगः। औपगवस्यापत्यं स्त्रीत्य इञ्निती प्राप्नोति। इतोमनुष्यजातेरिति ङीष् इ अंतात्प्राप्नो
ति। गोत्रं च चरणैः सह इत्यत्र गोत्रस्त्रीयस्य गोत्रस्य ग्रहणात् स्त्रियाश्चास्य गोत्रसंज्ञाया अभावात् एतच्चेत्य उपसंख्यानमजाद्यर्थमिसेतदनपेक्षैवो
दाहृतं गोत्रलक्षणाभ्यपचारिः पौत्रामेव स्यात् अजीवद्वंश्यायां च स्त्रियां पौत्रप्रभृतेरपत्ये जीवद्वंश्यायां तु नस्यादपत्यसामान्यलक्षण एव तु स्या
=दोषांतरमप्याह। गोत्रे ति। १= त् नियमादिति सामान्यापेक्षमेकवचनं नियमद्वयादिस्यर्थः॥ ॥ ॥

=पितुरेवापत्यमितिपक्षमुपक्षिप्य तत्रैव दोषमभिधाय तस्यैव प्रश्नो व्याहृत इत्यर्थः।१= विध्यर्थमिति। उपयुक्तशब्दे तीयेगोत्रप्रत्ययाप्राप्तेः पंचमेषु च प्रत्ययाप्राप्तेरितिभावः।२= किमुच्यत इति। नियमस्यैवाभावान्नियमप्रसक्तेरभावादित्यर्थः।३= गोत्रेति युवसंज्ञयाबाधनात्।४=

भा०कै०४
५७

कतरस्मिन्निति योनौ ज्ञापितो दोषस्तदीयोऽयं न प्रश्नः। विशेषात्। किं तर्हि पक्षप्रविभागदर्शनेन भाष्यकारेण नन्तरोक्तमेवार्थं प्रश्नपूर्वकं विवृणोति उत्सादयितरि
तावदिति अनियम इति यदुक्तं तत्र वाक्छलमुद्भावयति यदोत्सादयितुरेवापत्येन योगो नान्यस्य तस्मिंश्च विवक्षिते एकस्मा एव प्रकृतेरेक एव प्रत्ययः प्राप्नो
ति न त्वनेकस्तदा तत्र द्वयं नैव नियमार्थं किं तर्हि विध्यर्थमिति किमुच्यते स्त्रियां वा नियम इति प्रत्ययमालाप्रसंगदोषस्तु गोत्रलक्षणप्रत्ययाप्रसंगदोष
स्तु स्थित एव सर्वेष्विति वक्ष्यमाणेन न्यायेन सम्बन्धोऽपत्येन युज्यत इति पक्षोपपत्तिः। इदानीं वाक्छलं परिहरति उत्सादयितरि चेति चशब्देन केवलं

कतरस्मिन्पक्षेऽयं दोषः उत्सादयितर्यपत्ययुक्ते उत्सादयितरि तावत् अपत्ययुक्ते न दोषः उत्सादयितरीत्यपत्ययुक्तेन सर्वैस्तउत्सत्याभ
वितव्यं तत्र नियमो नोपपद्यते असति नियमे नैष दोषः सर्वेषु तर्ह्यपत्ययुक्तेष्वयं दोषः। सर्वेषु तर्ह्यपत्ययुक्तेषु सर्वैस्तउत्सत्याभवितव्यं तत्र नि
यमः उपपन्नो भवति। सति नियमे एष दोषः उत्सादयितरि चापत्ययुक्ते स्त्रियां युवसंज्ञाभिधानं न प्राप्नोति किं कारणं गोत्रसंज्ञा युवसंज्ञा
बाधते। गोत्राद्यूनि स्त्रियां प्रत्ययो विधीयते यूनि चेत्तर्हि नेष्यते प्राप्तिः यूनि चेत्तर्हि ते नियमस्य अप्राप्तिः गार्ग्यायणस्यापत्यमिति कतर
स्मिन्पक्षेऽयं दोषः सर्वेष्वपत्ययुक्तेषु सर्वेष्वपत्ययुक्तेषु तावन्न दोषः सर्वेषु हि अपत्ययुक्तेषु सर्वैस्तउत्सत्याभवितव्यं॥ ॥

पक्षान्तरे यावदस्मिन्नपि समासार्थस्य द्योतनार्थः अभिधानं न प्राप्नोतीति गोत्रविषयेण यञादिप्रत्ययेनेत्यर्थः अयमेवात्रानियमो विवक्षितः एको गोत्र
इत्येतन्नियमशब्देनोक्तं स्त्रिया गोत्रप्रत्ययेनाभिधानं न प्राप्नोतीत्ययमर्थोऽत्र विवक्षित इत्यर्थः यूनि चेति चतुर्थ्यादिना व्यवहिते पंचमादावित्यर्थः अत्रापि पू
र्ववत्पक्षद्वैकं पक्षप्रविभागेन विवरणं कर्तुमाह कतरस्मिन्निति॥ श्री ॥७॥ ॥

एम०
५७

तत्रनियमइति गोत्रादेवयूनीतिभावः परमप्रकृतेरिति पञ्चमस्यत्रिभिरपत्यापत्यवत्संबंधाभावादित्यर्थः यूनश्चेति चतुर्थ्यादित्यर्थः गोत्रादिति चतुर्थस्ययु
वत्वाद्गोत्रसंज्ञायाअभावः ननूत्पादयितपेयत्ययुक्तेनियंतस्याभावाद्गोत्राद्यूनीतिविध्यर्थमविष्यति तत्रानंतरेयूनिगोत्रात्सिद्धएवप्रत्ययइतिव्यवहि
तेयूनिगोत्रेणातस्यायोगादप्राप्तःप्रत्ययोविधास्यते तत्किमुच्यतेयूनिचांतर्हिते प्राप्तिःप्रत्ययस्येति उच्यते उत्पादयितर्यपत्ययुक्तेगोत्रसमुदायेप्रत्य
यमालाप्रसंगनिरासार्थमेकोगोत्रेइतिसूत्रंयथानियमार्थंएवंयुवसमुदायेयुवसामान्येवायुवशब्देनोच्यमानेगोत्रादगोत्राच्चप्रत्ययप्रसंगेगोत्रादेव
यूनीतिनियमेक्रियमाणेविध्यर्थत्वाभावाद्युक्तमुक्तंयूनिचांतर्हितइति संततहीति तेनव्यवहितेपियूनिगोत्रादेवेतिवचनाद्गोत्रात्प्रत्ययाभवि

तत्रनियमउपपन्नोभवति सतिनियमेनैषदोषःउत्पादयितरितस्येपत्ययुक्तेऽयंदोषःउत्पादयितरितस्येपत्ययुक्तेपरमप्रकृतेरनंतरएगोत्रा
च्चायोगान्नप्राप्नोति यूनश्चनप्राप्नोति किंकारणंगोत्रादितिनियमात् संततर्हिसर्वेपत्ययुक्ताइति कथंपुनर्ज्ञायतेसर्वेपत्ययुक्ताइति।ए
वंह्याह्निकाःपठंति दशपुरुषानूकंयस्यगृहेशूद्रानविद्येरन्सस्योमपिबेदिति यदिसर्वेपत्ययुक्ताभवंतितत्एतदुपपन्नंभवति
कथंयदुक्तंपितामहस्यात्संगेदारकमासीनंकश्चित्पृच्छतिकस्यायमिति॥सच्चाह॥ ॥ ॥ ॥

व्यंतीतिनास्यंयदोगोयूनिचांतर्हितइति दशपुरुषानूकमिति अनुपर्वोत्कायतेरनुकानमनूकइतिघञर्थेकविधानमितिकः।अन्येषामपीतिदीर्घत्वंदशपु
रुषाअस्मिन्ननूकइतिबहुव्रीहिःदशपुरुषोनूकोस्मिन्नितिपुनर्बहुव्रीहिः।दशपुरुषानुसंशब्दनंदशपुरुषेष्विनियावत् शूद्राइतिविवाहिताःशूद्रावेदीपत
त्यधइतिवचनात्सातर्हि.नुःशूद्राएकस्मिन्नुपतितेसर्वेषांपातइत्येतद्दशपुरुषानूकशब्देनोक्तंभवति ततश्चार्यादेकस्यैवसर्वोत्पत्त्यपातहेतुत्वादपत्यत्वमित्युक्तं
भवति नन्वेकस्यैवापत्यस्यात्माप्राणात्पद्यतेनान्येषांसंबंधः।क्रियागर्भोहिसर्वत्रसंबंधोनान्यथेतिउच्यते नैषदोषःपुत्रोत्पादनमेवपौत्राद्युत्पत्तावुपा
यः।तदंतरेणातस्याःसंभवात् अपत्यपौत्रप्रमृतीतिचमुख्यंसामानाधिकरण्यमस्मिन्पक्षउपपद्यते पूर्वेत्रतुपक्षेगौणंसामानाधिकरण्यंस्यादपत्याप

उत्पत्तिस्तस्येति सामान्यशब्दस्यापि क्वचिद्विशेषेऽप्यभिनिवेशो नात्र यथा गोमंडले अवस्थितं गोपालकं कश्चित्पृच्छति गाः पश्यसीति सर्वेषामिति यदा गार्ग्यस्यापत्यं प्रभृ
ति सर्वेषां गर्गगार्गिगार्ग्यगार्ग्याणामपत्यं भवति तदा गार्गिगार्ग्य इत्यपि प्रत्ययो मा भूत् गर्गशब्दादेव यथा स्यादित्येवमर्थमेको गोत्र इत्येतदित्यर्थः ननु ज्ञायत
इति एक इति सामान्येनोपादानाद्विशेषस्यानवगम इत्यप्रतिपादकत्वात्संदेहे लक्षणमप्रमाणं प्रसक्तमित्यर्थः उत्पादयितरि तत्प्रत्यययुक्ते क्रमेण संबंध

देवदत्तस्य यज्ञदत्तस्य वेति। उत्पादयितारं त्वपरिज्ञानात्तानमिति उत्पत्तिस्तस्या विवक्षिता सर्वेषां न इदमपत्यं देवदत्तस्य स्योत्पादयिते
ति अथ सर्वेषां प्रत्यययुक्ते युक्तिमनेन क्रियते एको गोत्र इति [illegible] सर्वेषामप्यप्रत्ययोगात्प्रत्ययान्ताद्द्वौ त्रै प्रतिषेधार्थमेको गोत्रे सर्वेषा
मप्यप्रत्ययोगात्प्रत्ययान्ताद्द्वौ त्रै प्रतिषेधार्थमेको गोत्र इत्युच्यते अस्तिप्रयोजनमेतत् किं तर्हीति ननु ज्ञायते क एको भवतीति यो वाप
रमप्रकृतेर्यो वा अनंतरादिति नियमानुपपत्तिश्च नियमश्च नोपपद्यते किं कारणं नह्येकस्मिन्नपत्ये नेकप्रत्ययप्राप्तिः नह्येकस्मि
न्नपत्येऽनेकः प्रत्ययः प्राप्नोति किं तर्हि अपत्यांतरे शब्दांतरात्प्रत्ययांतरप्राप्तिः अपत्यांतरेऽपत्यांतरे शब्दांतराच्छब्दांतरात्प्रत्ययांत
रं प्रत्ययांतरं प्राप्नोति प्रकृतादिञ् इञंतात्फगिति। फिञोः ॥ श्री ॥ ॥

विवक्षायां गोत्रसमुदाये प्रत्ययमालाप्रसंगे एक एव भवतीत्युच्यमाने य एव परमप्रकृतेः प्राप्नोति स एव भवतीति नास्ति तत्रैकविशेषाज्ञानलक्षणो दोषः नह्येक
स्मिन्निति एकेनैव तत्स्यार्थे सोऽकत्वादस्मिन्नपत्ये एकः प्रत्ययः क्रियते तस्मिन्नेव नास्य परस्य प्रत्ययस्य प्रसंग इति तन्निवारणमनर्थकमेवेत्यर्थः अ
पत्यांतर इति सामान्यापेक्षं वार्तिक एकवचनं भाष्यकारस्तु भेदं वीप्सां च साकल्यप्रतिपादनायाश्रित्य विवृणोतीति ॥ ॥ ॥

दाशतयीति दशावयवा यस्य संघस्य दशतयः संघस्तत्र भवा दाशतयी। अनेकप्रत्ययप्रसंगप्रतिपादनपरं चैतत् न त्वत्र दशावयवो विवक्षितः। अतोनंतरमेव कश्चित्सु
तः केचित्पदंसमुदायश्चेदिति पठ्यते। अन्यत्र तु प्रत्ययमालाप्रसंगो यथानंतरं कतरस्मिन्निति। यादि सर्वं पूर्वोक्तं पठ्यते न तस्तु नरूकलादयोऽयत्तारमेरपेक्षितं अन्ये त्वेवं प
ठंति कतरस्मिन्पक्षे एष दोषः। सर्वेष्वपत्ययुक्तेषु सर्वेष्वपत्ययुक्तेषु तावन्न दोषः सर्वेषु त्वपत्ययुक्तेषु सर्वत्र उत्सस्याभवितव्यं तत्र नियम उपपन्नो भवति। सति

तरि

नियमे नैष दोषः। उत्सादयितं हि अपत्ययुक्ते अयं दोषः उत्सादयितरि सर्वपत्ययुक्तेन सर्वत्र उत्सस्याभवितव्यं तत्र नियमो नोपपद्यते असति नियम एष दोषः उत्साद
यितरि चापत्ययुक्ते न दोषः कथं अपत्यं समुदायश्चेदिति अयं ग्रंथ एव पक्षप्रविभागेन दोषपरिहार एतत् अस्यायमर्थः यदा सर्वे अपत्ये न युज्यन्ते तदैकस्मि

दाशतयी प्रत्ययमाला प्राप्नोति कतरस्मिन्पक्षे अयं दोषः सर्वेष्वपत्ययुक्तेषु सर्वेष्वपत्येषु तावन्न दोषः सर्वेषु हि अपत्ययुक्तेषु स
र्वत्र उत्सस्याभवितव्यं तत्र नियम उपपन्नो भवति सति नियमे नैष दोषः उत्सादयितरि तर्ह्यपत्ययुक्तेऽयं दोषः उत्सादयितरि तर्ह्यपत्य
युक्ते न सर्वत्र उत्सस्याभवितव्यं तत्र नियमो नोपपद्यते असति नियमे एष दोषः॥ ॥ ॥ ॥

त्रैवर्गगोत्रापत्ये गर्गगार्गिगार्ग्येभ्यः पर्यायेणापत्यापत्यसंबंधविवक्षायां प्रत्ययप्रसंगः। तत्र यदा गर्गशब्दात्प्रत्यय उत्पद्यते तदैक एव गोत्रापत्ये प्रत्ययो भवति यदि
तु गार्गिगार्ग्यशब्दाभ्यामुत्पद्येत तदा पूर्वस्मिंश्छिन्ने परस्योत्पादनादनेकः प्रत्ययः कृतः स्यात् तस्मादनेकप्रत्ययनिवारणायैको गोत्र इति नियमः क्रिय
ते तेन गर्गशब्दादेवोत्पत्तिरनुज्ञाता भवति यदा तूत्सादयितैवापत्येन युज्यत इति पक्षो गोत्रशब्देन चैकमेवापत्यमुच्यते तदोत्सादयितुरेवैक एव प्रत्य
यः प्राप्नोतीति नियंतव्याभावान्नियमो नोपपद्यत इत्यपत्यपरंपराविवक्षायां प्रत्ययमालाप्रसंगदोष आपतत्येव॥ ॥ ॥

=गोत्रे कुञ्जादीनां ७= इत्युक्तं भवतीति। तथा चास्मिन् पक्षे प्रत्ययमालाप्रसंगदोषवारणार्थं एको गोत्र इति सूत्रं सर्वथा पक्षे योग इति पक्षे तु गार्गि गार्ग्यादिभ्यो ऽपि प्राप्तस्य प्रत्ययस्याभावो वेति बोध्यं ४=

भा० कै० ४
५९

अत्रापि पक्षे परिहारो ऽभिधीयते अपत्यं समुदायश्चेदिति अपत्यशब्देनापत्यसामान्यवाचिना पितृव्यपदेशाद्गोत्रापत्यमेवोच्यते। तेनायमर्थो गोत्रशब्देन गोत्रसमुदायो ऽभिधीयते अवयवधर्मेण समुदायस्य गोत्रव्यपदेशात् अन्ये त्वाहुः अपत्यं पौत्रप्रभृति गोत्रमित्यत्रापत्यशब्देन समुदायो ऽभिधीयत इति तस्यैव गोत्रसंज्ञा क्रियते क्वचित्त्ववयवमात्रे ऽपि गोत्रशब्दो वर्तते समुदायेषु चरिताः शब्दा अवयवेष्वपि वर्तन्त इति न्यायात् ततश्चैको गोत्र इत्यस्यायमर्थः पौत्रप्रभृत्यपत्यपरंपराविवक्षायां प्रत्ययमालाप्रसंगे एक एव कर्तव्यो नानेक इति परमप्रकृतेरेव संबन्धाश्रयेणापत्यापत्यवत्संबन्धविवक्षायां प्रत्ययः कर्तव्य इत्युक्तं भवति न

संबंधि०

उत्पादयितरि चापत्यस्य युक्ते न दोषः कथं अपत्यं समुदायश्चेन्नियमो ऽस्य समीक्षितः तस्मिंस्तु बहवः प्राप्ता नियमो ऽस्य भविष्यति अपत्यमपि सनेन सर्वेषु पुरुषादिष्वपि न कमपत्यं समीक्षितं तस्मिंस्तु बहवः प्रत्ययाः प्राप्ता नियमोऽस्य भविष्यति एको गोत्र इति यदप्युच्यते स्त्रियां चानियम इति एवं वक्ष्यामि गोत्राद्यूनि प्रत्ययो भवति स्त्रियां नेति एवमपि स्त्रिया युवसंज्ञाभिधानं न प्राप्नोति एवं तर्हि एवं वक्ष्या-
मि गोत्राद्यूनि प्रत्ययो भवति ॥ श्री ॥ ७ ॥

स्त्रियां त्रितिसमुदाय इत्यर्थः एवमपीति अस्त्रियामिति योगविभागे ऽपि हि तेयदि नाम गोत्राद्येव यूनीत्यस्य नियमस्य निषेधो न भवति तथापि प्राधान्याद्युवप्रत्ययस्यैव निषेधः प्राप्नोति न तु युवसंज्ञायाः। ततश्च गोत्रलक्षणः प्रत्ययो न प्राप्नोति अपत्यसामान्यलक्षण एव तु प्रत्ययः स्यादित्यर्थः ततश्च गार्ग्यस्यापत्यं स्त्रीति गार्गीशब्दाद्यत्र स्यात् तदभावाद्यत्रश्च प्राचां ष्फ तद्धित इति ङीषि ष्फेन स्यात् गार्ग्यायणीति ॥ श्री ॥ ७ ॥

गार्गी०

एम०
५९

स्त्रियां लुगिति गार्ग्ये शार्ङ्गरवकौ लुकि कृते यत्र आश्रयं रूपद्वयं सिध्यति एवमपीति औपगवस्यापत्यं स्त्री इत्यतः अणो लुकि कृते अनुपसर्जनाधिकारादणभावार्थे द्वा
रेणोपसर्जनत्वान्नदर्थस्य प्रत्ययार्थं प्रति विशेषणत्वादणलक्षण ईकारो न प्राप्नोतीत्यर्थः अणन्तादिति प्रत्यये लुप्ते प्रकृतिरेव प्रत्ययार्थमाहेत्यणन्तस्यानु
पसर्जनत्वमिति भावः काशकृत्स्निनेति इञ् अश्वत्थमणन्तं तादर्थ्ये आमणन्तस्य प्रोक्ताल्लुगिति लुक् लुक्तद्धितलुकीति स्त्रीप्रत्ययस्य लुक् न त्वणन्तस्या
ध्येत्री संक्रान्तत्वादनुपसर्जनत्वादीकारप्रसङ्गः पुनर्न भविष्यतीति शाह्वस्य स्वकृतत्वं साचरितार्थत्वादिति भावः टाप्तु पूर्वमनुत्पन्नरस्तु त्यध
ते। अपवादस्याप्रवृत्तावुत्सर्गस्यानिवारणात् नन्वेवमपि शालिनाम्नोक्तमापिशलं तदधीते आपिशला ब्राह्मणीति ङीप् प्राप्नोति तस्मादण ए

ततः स्त्रियां लुक्। एवमपि औपगवी माणविका अनुपसर्जनादितीकारो न प्राप्नोति माभूदेवं अणः अनुपसर्जनमिति अणन्तादनुपसर्जना
दित्येवं भविष्यति नैवं शक्यं इह हि दोषः स्यात् काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी तामधीते काशकृत्स्ना ब्राह्मणी अणन्तादितीकारः
प्रसज्येत नैष दोषः अध्येत्र्यामभिधेयायां अण ईकारेण भवितव्यं यश्चात्राध्येत्र्यामभिधेयायामण् लुप्तः सः यश्च श्रूयते उत्पन्नः स तस्मादीका
र इति कृत्वा पुनर्न भविष्यति इह तर्हि औपगवी माणविका भार्या अस्य औपगवीभार्यः जातिलक्षणः पुंवद्भावप्रतिषेधो न प्राप्नोति माभूदे
वं वृद्धिनिमित्तस्येत्येवं भविष्यति यस्तर्हि न वृद्धिनिमित्तः ग्लुचुकायनी माणविका भार्या अस्य ग्लुचुकायनीभार्यः॥ ॥ ॥

वानुपसर्जनग्रहणं विशेषणमित्यौपगवी माणविकेति न सिध्यति एवं तर्हि वक्ष्यमाणदोषादिष्टसिद्ध्यभावादेतद्भाष्यकारेण न सम्यङ् निरूपितं जातिलक्षण इति
गोत्रसंज्ञायाश्च भावे जातिरूपाभावात् यद्यपि गोत्रं च चरणैः सहेत्यत्र गोत्रशब्देनापत्यमात्रं गृह्यते तदौपगवीभार्य इत्यत्र जातिलक्षणः पुंवद्भावप्रतिषेधो
सिध्यत एव ग्लुचुकायनीति ग्लुचुकस्यापत्यमिति प्राचामवृद्धादिति फिन् प्रत्ययः तदन्ताल्लुकि क्रियमाणे जातित्वाभावादितो मनुष्यजातेरिति ङीष् न प्रा
प्नोति। अथापि सर्वतोऽक्तिन्नर्थादिति ङीष् क्रियते तथापि पुंवद्भावप्रतिषेधो न प्राप्नोति लुक् चाधिको विधेयः॥ ॥ ॥

तस्मादिति अस्त्रियामिति योगविभागे सति यूनीति वर्त्तते। परिभाषा चेयं। तेन युवसंज्ञायामप्युपतिष्ठते तत उपस्थानेन स्त्रियां युवसंज्ञा निवार्यते इति गोत्रसं
ज्ञा प्रवर्त्तते यूनि वर्त्तत इति युवसंज्ञाया अभावे पि युवत्वेन पौत्रप्रभृतेरपत्यमुपलक्ष्यत इति यूनीत्युक्तं इदानीं पक्षद्वयोक्तदोषपरिहाराय तत्तंत्रकीर्त्त
नं करोति इहेति सर्वेषामिति ननु नायं दोषः पूर्वमुक्तः नैतदस्ति ननु त्वायतेक एकोऽभवतीत्यभिधानादर्थेत उक्त एवायं दोषः तस्मादिति नापत्यादिसे

तस्मात्स्त्रियां युवसा युवसंज्ञैव पर्युदसितव्या तस्यां च पर्युदस्तायां गोत्रप्रत्ययान्तमेतत् यूनि वर्त्तते इहोत्साद्यित्वे पसयुक्ते प्रत्य
यान्तात्प्रतिषेधो वक्तव्यः परमप्रकृतेस्त्योऽसन्निवेक्तव्या सर्वेषु पसयुक्तेषु प्रत्ययान्तात्प्रतिषेधो वक्तव्यः तस्मात्प्रतिषेधः तस्मात्प्रतिषे
धो वक्तव्यः संज्ञाकारिभ्यो वा प्रत्ययोत्पत्तिः अथवा संज्ञाकारिभ्यः प्रत्ययोत्पत्तिर्वक्तव्या यदि संज्ञाकारिभ्यः प्रत्ययोत्पत्तिरुच्यते कथं गार्ग्या
यणः वात्स्यायन इति गोत्राद्यूनीति च गोत्राद्यूनी सेतद्वक्तव्यं तच्च जात्यादिनिवृत्त्यर्थं॥ तच्चावश्यं संज्ञाकारिग्रहणं कर्त्तव्यं किं प्रयो
जनं जात्यादिनिवृत्त्यर्थं जात्यादिभ्य उत्पत्तिर्मा भूदिति जातिर्न वर्त्तते संख्या न वर्त्तते सर्वनाम न वर्त्तते जातिर्न वर्त्तते काकस्यापत्यं कुक्कुर

॥स्यापत्यमिति॥ ॥श्री ॥७॥ ॥

वक्तव्यान्तेनापत्यप्रत्ययान्तादपत्ये प्रत्ययो न भवतीत्ययमर्थः संपद्यते संज्ञाकारिभ्य इति कुलव्यपदेशहेतवः आरिपुरुषाः संज्ञाकारिण उच्यन्ते जातिर्न्नेति
प्रत्ययं नोत्पादयतीत्यर्थः परार्थाभिधाने द्विवृत्तिः स्मृतिः चप्रत्यये प्रकृतिः प्रत्ययार्थे वर्त्तते तत्र जात्यादिवृत्तिः संज्ञाकारिग्रहणेन निवार्यते॥ ॥

=नवर्त्ततइत्यनेनप्रत्ययानुत्पत्तिः कथं जन्येत्यत आह पदार्थेति-१=

=निराधारस्येति॰नवादीनां संख्येयपरत्वेपि संख्येयविशेषा[illegible]पेक्षया॰सामर्थ्यं॰२= सर्वेति॰इदमनुपलक्षणंमसिद्धानुवृत्तये॥१२=

येनैवेति अपत्यविशेषप्रतिपत्तये प्रकृत्यर्थो विशेषणमुपादीयते सच विशेषो जातिसंबंधावगमे नैवावगम्यत इत्यपत्यापत्यवत्संबंधविवक्षायामेवात्राभाव इत्यर्थः संख्येयमिति ब्राह्मणादिकमवश्यापेक्षणीयं निराधारस्य गुणस्याभावादिसर्थः निर्दिष्टमिति सर्वप्रकृतमित्यर्थः हृतिरपीति यदाजात्युपलक्षं जनानिनाभि

संख्यानवर्तते नवानामपत्यं दशानामपत्यमिति सर्वेनाम नवर्त्तते सर्वेषामपत्यं विशेषामपत्यमिति यत्तावदुच्यते जातिर्नवर्त्तते। काकस्यापत्यं कुररस्यापत्यमिति येनैव हेतुना एकः काकः तेनैव हेतुना द्वितीयस्तृतीयश्च काको भविष्यति यदप्युच्यते संख्या नवर्त्तते। नवानामपत्यं दशानामपत्यमिति। संख्येयमपेक्ष्य संख्या प्रवर्त्तते तत्सापेक्षं सापेक्षं चासमर्थं भवतीति असामर्थ्यान्न भविष्यति यत्तावदुच्यते सर्वेनाम नवर्त्तते सर्वेषामपत्यं विशेषामपत्यमिति। निर्दिष्टमपेक्ष्य निर्देशः प्रवर्त्तते तत्सापेक्षं सापेक्षमसमर्थं भवतीति असमर्थत्वान्न भविष्यति यत्तावदुच्यते येनैव हेतुना एकः काकः तेनैव हेतुना द्वितीयस्तृतीयश्च काको भविष्यतीति नैतद्विवदामहे काको न काक इति किं तर्हि येनैव हेतुना एतद्वाक्यं भवति काकस्यापत्यं कुररस्यापत्यमिति तेनैव हेतुना वृत्तिरपि प्राप्नोति यदप्युच्यते संख्येयमपेक्ष्य संख्या प्रवर्त्तते। तत्सापेक्षं सापेक्षं चासमर्थं भवतीति भवति वैकस्यचिदर्थोन प्रकरणाद्वापेक्षं निर्ज्ञातं

१ यदानिर्ज्ञातं तदा वृत्तिः प्राप्नोति॥ ॥ ॥

यत्रानिर्ज्ञातापित संबंध एव विशेषावगमायोपादीयते तत्र वाक्यवद्वृत्तिप्रसंग इत्यर्थः भवतीति तत्रश्च संख्याशब्द एव विशिष्टसंख्येयवाचीति सापेक्षत्वाभावाद्वर्त्तत एवेत्यर्थः॥ ॥श्री ॥७॥ श्री ॥

=सर्वेषामित्युक्ते केषामिति नि=
=यताकाङ्क्षोदयान्निर्दिष्टविशे=
=षमपेक्ष्य सर्वनाम्नां निर्देशः=
=प्रवर्त्तत इत्यर्थः॥१४=

आहेयेनेति अहेरपत्यमिति अहाविन्न इति ढक् पांचिरिति वाह्वादित्वादिञ् गार्ग्यायणिरिति उदीचां वृद्धादिति फिञ् एका प्रकृतिरिति एकशब्दः संख्यावाची
ति केचिदाहुः प्रथमातिक्रमे च कारणाभावात् परमप्रकृतिरेवैकशब्देनाख्यते शङ्कापेक्षया चैक इति पुंलिङ्गेन निर्देशः ॥ अन्ये तु साधारण एक इत्याहुः

यदप्युच्यते सर्वेषामपत्यं विश्वेषामपत्यमिति निर्दिश्यमपेक्ष्य निर्देशः प्रवर्तते। तत्सापेक्षं सापेक्षमसमर्थं भवतीति भवत्येवैकस्य चिद् यो
त्रिकरणाद्वापेक्षं निर्ज्ञातं यदा निर्ज्ञातं तदा वृत्तिः प्राप्नोति एवं तर्ह्यनभिधानाज्जात्यादिभ्य उत्पत्तिर्न भविष्यति तच्चावश्यमनभिधानमाश्र
यितव्यं क्रियमाणेपि हि संख्याकाशिग्रहणे यत्र जात्यादिभ्य उत्पद्यमानेन प्रत्ययेनार्थस्याभिधानं भवति भवति तत्रोत्पत्तिः तद्यथा। कुतश्चर
तिमायूरिः केन काषिंजलिः कुशाः। आहेयेन चरदष्टस्य पांचिः प्लुतसमो मतः गौडायनिः यारायणिः कौमायनिरिति तदेतदनर्थ्यं संज्ञाका
वा४ रिग्रहणं कर्तव्यं प्रत्ययान्तात् प्रतिषेधो वक्तव्यः उभयं न कर्तव्यं गोत्रग्रहणं न करिष्यते एकोऽपत्ये प्रत्ययो भवतीत्येव यदि चेदानीं प्रत्ययान्ताद
पि प्रत्ययः स्यात् नैकोऽपत्ये प्रत्ययः कृतः स्यात् यदि गोत्रग्रहणं न क्रियते कथं गार्ग्यायणः वात्स्यायन इति वक्तव्यमेवैतत् गोत्राद्यूनस्त्रिया
मिति अथापि गोत्रग्रहणं क्रियते एवमपि न दोषः न एकग्रहणेन प्रत्ययोऽभिसंबध्यते एको गोत्रे प्रत्ययो भवतीति किं तर्हि प्रकृतिरभिसं
बध्यते एका प्रकृतिर्गोत्रे प्रत्ययमुत्पादयतीति यदि चेदानीं प्रत्ययान्तादपि प्रत्ययः स्यात् नैकप्रकृतिर्गोत्रे प्रत्ययमुत्पादयेत् अथवा अपत्या
ऽनेऽन्यं यत्नः क्रियते॥ ॥ ॥ ॥ ॥

परमप्रकृतिश्च सर्वेषामपत्यानां साधारणीति तेन न एकोत्पत्तिर्भवति सर्वेऽपत्येन न प्रत्ययान्तरस्य पंचपक्षः प्रमाणोपपन्नत्वात् स्थितः॥ ॥ ॥

नहीदृमिति लोके योर्थे एकश दृश्यते स एव हाश्रीयते लोके च प्रथम शब्द समाना र्थे एकशब्दो दृश्यते इती हापि प्रथम वाची शाश्रीयते शास्त्रेपि प्र
थमार्थ एकशब्दो दृश्यते। एके ऽल्प्राणा इत्यत्र प्रथमे ऽल्पप्राणा इति गम्यते उपाचरंतीति ख्यवहरंतीत्यर्थः अ्समां पंक्तौ वर्तमान येसा प्रोलनियत स्तेक
सा वगमात्से रूयावाच्यकशब्देन प्रथम वाची॥ ॥ इ सुपाध्याय जम्पार पुत्रकै म्पार्कृते भाष्य प्रदीपे चतुर्थाध्यायस्य प्रथमे पादे तृतीयमान्हि

नहीदंलोकाद्घ्रियते। लोके हि संख्यां प्रयुंजानामनुपचरंति एक इति वा प्रथम इति वा या वद्ब्रूयात्प्रथमो गोत्रे प्रत्ययमुत्सादयतितावदेको
गोत्र इति॥ ॥ इति श्रीमहाभाष्ये चतुर्थस्याध्यायस्य प्रथमपादे तृतीयमान्हिकं॥ ॥ अत इञ् इञो वृद्धादूदृद्धाम्प्यां फिन् फिनो विप्रतिषे
धेन इञो वृद्धाद्वृद्धाम्पां फिञ् फिनो भवतः विप्रतिषेधेन इञो वकाशः दाक्षिः प्लाक्षिः फिञो वकाशः तारायणिः इहोभयं प्राप्नोति यनिःयारा
तापसायनिः सांमितिकायनिः फिनो वकाशः त्वचायनिः स्रुकायनिः इञः स एव इहोभयं प्राप्नोति स्रुचुकायनिः फिञ् फिनोभ
वतो विप्रतिषेधेन इहकस्मान्नभवति दाक्षिः प्लाक्षिः बहुलवचनात तद्राजस्य तद्राजस्य इञो भवति विप्रतिषेधेन। तद्राजस्या
ऽवकाशः ऐक्ष्वाकः इञः स एव इहोभयं प्राप्नोति पांचालः वैदेहः वैदर्भः ॥ ॥

कं॥ ॥ अत इञ् दाक्षिरित्येवानामधेयस्येति यदा वृद्धसंज्ञा नास्ति तदा पमिञो वकाशः इञः स एवेति प्राचामवृद्धात्फिन्बहुलमिति प्राचांमते न फिनो विधाना
दुदीचांमते तदभावादिञो ऽवकाश इति भावः इहकस्मादिति प्राचांमते नावृद्धलाक्षिन्प्राप्नोतीति भावः ऐक्ष्वाक इति इक्ष्वाकोरपत्यमिति जनपद शब्दात्
क्षत्रियादञित्यञ्। दांडिनायनादिसूत्रेणोकारलोपो निपात्यते पांचाल इति पांचालविदेहविदर्भेभ्यो ञ्॥ ॥ ॥ ॥

=नतद्राजस्यावृद्धत्वात्कथं फिञिति: कथमिञः सर्वदेवासुकमतमारु: प्राचामिति: इञ्=

बाह्वा बाह्वादिप्रभृतिष्विति प्रभृतिग्रहणेन वृक्षमालानां कुञ्जादिनडादीनां ग्रहणं लौकिक इति लोके विदित इत्यर्थः गोत्राभाव इति संज्ञाकारित्वे आदिपुरुष
त्व इत्यर्थः एतच्च स्मृतिशास्त्रस्यार्थेनोऽनादित्वादनार्घ्याभिधायि बाह्वादिग्रहणस्यान्याय्यत्वाल्लभ्यते यत्तु कार्यविशिष्टशब्दस्वरूपोपादानेन न विधीयते किं
तु प्रकारान्तरेण यथा तद्धितेति तद्दिदर्शनीतनार्थाभिधायिनोऽपि भवतिरेवदन्निरिति संबंधिशब्देति अयमपि न्यायानुवादः आदिमत्वात्संज्ञात्वं श्वशुरस्य संबं
धोपाधिकत्वत्वनादित्वात्तद्ग्रहणस्यैवन्याय्यत्वात् मातृष्वसेति मातृशब्दोऽत्र क्रियावाचीनजननीवाचीति मातृपितृभ्यां स्वसेति षत्वं न भवति यद्यपि कि

तद्राजो भवतीति विप्रतिषेधेन बाह्वादिभ्यश्च बाह्वादिप्रभृतिषु येषां दर्शनं गोत्रभावे लौकिके ततोऽन्यत्रैतेषां प्रतिषेधः बाह्वादिप्रभृतिषु येषां
दर्शनं गोत्रभावे लौकिके ततोऽन्यत्रैतेषां प्रतिषेधो वक्तव्यः बाहोरपत्यं बाहविः यो हि बाहुर्नाम बाहवस्तस्य भवति नडस्यापत्यं नाडायनः यो हि न
डो नाम नाडिस्तस्य भवति संबंधिशब्दप्रत्ययानां च तत्सदृशात्प्रतिषेधः संबंधिशब्दप्रत्ययानां च तत्सदृशात्प्रतिषेधो वक्तव्यः श्वशुरस्या
पत्यं श्वशुर्यः यो हि श्वशुरो नाम श्वाशुरिस्तस्य भवति प्रत्ययग्रहणेन नार्थः संबंधिशब्दानां तत्सदृशात्प्रतिषेध इत्येवं इदमपि सि
द्धं भवति। मातृपितृभ्यां स्वसा मातृष्वसा पितृष्वसा अन्या तु मातृस्वसेति सुधातुरकङ् सुधातृव्यासवरुडनिषादचण्डालबिंबानामिति वक्तव्यं सौधातकिः वैयासकिः
शुकः। अत्र सत्यमिदमुच्यते सुधातृव्यासवरुडनिषादचण्डालबिंबानामिति वक्तव्यं सौधातकिः वैयासकिः शुकः वारुडकिः नैषादकिः
चाण्डालकिः बैंबकिः तन्नहि वक्तव्यं न वक्तव्यं प्रकृत्यन्तराण्येवैतानि॥ ॥

पाणिन्यर्थोऽपि निसः तथापि प्र सिद्धतरं संबंधिलक्षणोऽर्थ इति तस्यैव ग्रहणं युक्तं उक्तं च हरिणा अभिव्यक्तपदार्थाये स्वतन्त्रा लोकविश्रुताः शास्त्रार्थस्तेषु
कर्तव्यः शब्देषु न तदुक्तिष्विति सुधा प्रकृत्यन्तराणीति स्वार्थिककप्रत्ययान्तत्वादिति भावः अन्यथि कम्ययेन च कृतन्निहितेवांकामेव भवति व्यासक शब्दाच्च
कन्नंतादपि वाचिनोऽपि वाह्वादेराकृतिगणत्वादिञ्भवति ननु ऋष्यणिति भावः॥ ॥ ॥ ॥

वैयासकिरिति व्यासकशब्दात्संतानोऽपि वैयासकां संहितायामिति प्रयुज्यते वैयासिकामिति तत्र भ्रमेव २=

गोत्रे। अथापि फक् इति सर्वेषां सामान्यग्रहणं प्राप्नोति। एवं परमेतत् फित्ति क्रियमाणे कौञ्जायना इति ञित्स्वरप्रसंगः। सूत्रभेद इति चफञ्यपि सिध्यति सूत्र

गोत्रे कुंजा किमर्थं ञकारः स्वरार्थः। ञितोंत उदात्तो भवतीत्यंतोदात्तत्वं यथा स्यात्। अथ नकारः किमर्थः। नकारो वृद्ध्यर्थः। ञ्णितीति वृद्धिर्यथा स्यात्
एकेन ककारेणोभयं सिद्धं। अव्ययमत्र विशेषणार्थोऽनुबंधः कर्तव्यः क्व विशेषणार्थे नार्थः। ग्रातप्फञोरस्त्रियामिति फकि लुग्यमाने ना
डायनः अत्रापि प्रसज्येत। अथापि फक् इत्युच्यते एवमप्याड्डायनस्यात्रापि प्रसज्येत। तस्मात्कार एव कर्तव्यः। अंतोदात्तत्वमपि यथा स्यात्। चका
रेचेदानीं विशेषणार्थे क्रियमाणे अवयवग्रहणार्थोऽनुबंधः कर्तव्यः। स च नकार एव कर्तव्यः सूत्रभेदो मा भूदिति अथ क्रियमाणेपि वै चकारे
अंतोदात्तत्वं न प्राप्नोति किं कारणं परत्वात् ञ्नितीत्याद्युदात्तत्वं प्राप्नोति चित्करणसामर्थ्यादंतोदात्तत्वं भविष्यति ञित्करणसामर्थ्यादा
द्युदात्तत्वं प्राप्नोति अस्त्यन्यञ्नित्करणे प्रयोजनं किं वृद्ध्यर्थो ञकारः चित्करणेपि तर्हि अन्यत्प्रयोजनमस्ति किं विशेषणार्थश्चकारः श
क्यात्र विशेषणार्थोऽन्योऽनुबंधः आसंक्तुं तत्र चकारानुरोधादंतोदात्तत्वं भवति। वृद्ध्यर्थोप्यन्यः शक्योऽनुबंध आसंक्तुं तत्र ञकारानुरोधादाद्यु
दात्तत्वं प्राप्नोति एवं तर्हि सूत्रे योगविभागः करिष्यते इदमस्ति चितः चित अंत उदात्तो भवति ततस्तद्धितस्य तद्धितस्य चितः अंत उदात्तो
भवतीति किमर्थमिदं परत्वाञ्ञितीत्याद्युदात्तत्वं प्राप्नोति तद्बाधनार्थं ततः कितः कितः तद्धितस्यान्त उदात्तो भवतीति किं पुनरत्रस्व
ऽ एवार्थे न चकारेणानुबंधेन यावता स्फञंतात् ञ्यो विधीयते॥ ॥ ॥

भेदस्तु स्यादिति भावः एवं तर्हीति चकारस्य विशेषणे चरितार्थता दृष्टैव ञकारस्य परत्वाञ्ञित्स्वरप्राप्ताविसर्थः॥ ॥ ॥७॥ ॥

भा०कै०४
६३

तत्रस्त्रियामिति सतिशिष्टस्वरस्य बलीयस्त्वादिति भावः इहेति पूर्वे वैयाकरणाः केनयशब्द इति यथा वृत्तस्य बहुले प्रयोगाभावात् यदा तु स्त्रियां क्रियते तदा गोत्रे त्वलु
गचीति लुक्प्रतिषिद्धे यशब्दः श्रूयते कौंजायन्यस्यापत्यानि बहूनीत्यत्र ओ एप्प्रत्ययार्थे लुक्ति तद्राजोऽतस्य बहुषु वर्तमानात् स्त्रियां लुक्भवति

=तत्र जहातः १८=

तत्रस्त्रियामित्यसाद्युद्दात्तत्वेन भवितव्यं नैतदस्ति बहुषु लोपे कृते न्यन्तोदात्तत्वं यथा स्यात् कौंजायना इति इह केचित् छ्यकयोः फञ्चेन्दिरधति बहु
षु च फकं केचित् न्यूनं तान्यम्। किमत्र न्यापं न्यवचनमेव न्यापं छ्यकयोर्हि फञ्चेत्सति बहुषु च फक् किं कौंजायना नाम पतं समाणवकः कौंजाय
न्यः कौंजायन्यौ केनयशब्दः श्रूयेत छ्यकयोरिलुच्यमानो न प्राप्नोति इह कौंजायन्यस्यापत्यं बह्वो माणवकाः कौंजायनाः केनयशब्दो न श्रूयेत छ्य
कयोरिलुच्यमानः प्राप्नोति तदेतत्कथं कृत्वा न्यवचनेन्यायो भवति यदि तन्नास्ति आपसंबागोत्रं परमप्रकृते ग्राम्यात्सः आपसा न्नो वर्ह्नृष्णा
त्वार्थे द्वितीयेयुवसंज्ञः सच्चाह्नियां एको गोत्रग्रहणानर्थकं च बहुवचनलोपिषु च सिद्धमिति सतिहि तस्मिन् छ्यकयोरपि फञ्त्रिसति बहुषु च
फ क्सति न दोषो भवति। तत्र कौंजायना नाम पतं समाणवक इति विगृह्य कुंजशब्दात् छ्यकयोः त्रस्मिन्प्रविष्यति कौं जायन्यः कौंजायन्यौ कौंजायाना ना
मपसंमाणवका इति विगृह्य कुंजशब्दात् बहुषु लस्त्रिषु विष्यति कौंजायना इति अनन्तरापत्ये तर्थे इत्युच्यते तत्रेदं न सिध्यति कौशिको विश्वामि
त्र इति किं कारणं विश्वामित्रस्तपस्तेनानृषिः स्यामिति तत्र भवानृषिः संपन्नः स पुनस्तपस्तेपे नाऽनृषेः पुत्रः स्यामिति तत्र भवान्गाधिरपि

आपत्यं वेति गोत्रे लुगचीत्यत्रेत द्याख्यातं कुंजशब्दादेव यूनि फञ्त्रिकि च कृते स्वार्थिकस्य चेत्रो लुकि कृते सर्वेष्टसिद्धिः अनन्तरापत्ये अनन्तरानन्तर्ये इत्यस्यायं भावः सं
भवति ऋषीणामानन्तर्ये नन्तरस्य धानेन भवति यद्यानन्तर्यं तेन ऋषिप्रयोऽनन्तरापत्ये प्रत्ययो न भवतीति उभयत्राप्यसमर्थसमासः भवति नानन्तरः

तस्मै वानं॰ ॥संबंधात् तत्राद्यपक्षाश्रयेणा पूर्वः पक्षो द्वितीयपक्षाश्रयेणोत्तरं ॥ ॥

१०
६३

=विशेषविषयस्येति। ऋषिभ्योऽनन्तरे न भवतीति प्रतिषेधेनानृषिभ्योऽनन्तरे भवतीति विशेषोऽनुमीयते। स चानन्तरे कौडिन्यन्यायोऽत्रेऽप्यबाधक इति भावः॥२८=

संज्ञागोत्राधिकारादिति। संज्ञया यः प्रोक्तं पौत्रप्रभृति तदेवाधिकृतं न त्वपत्यमात्रमित्यर्थः। तेषामनन्तर इति। अन्यथा प्रतिषेधोऽनर्थकः स्यात्। तत्रर्षिभ्यो गोत्र एव स्वप्रत्ययः। अनृषिभ्यस्त्वनन्तरापत्य एवेत्येष विषयविभागः। नन्वस्माज्ज्ञापकादनृषिभ्योऽपत्यमात्रे प्रत्ययः प्राप्नोति। नैष दोषः। विशेषविषयस्यानुमानस्याश्रयणात्। वृत्तौ लुक्स्त्रियामिति वक्ष्यामीति। तत्र च वृत्तौ शाहानुवृत्त्यर्थमेतदित्यर्थः। यदीति। गणे एव वृत्तौ शाह्नानन्तरं लुक् स्त्रियामिति पठितव्यमिति भावः। आङ्गि-

स पुनस्तदपत्यं पौत्रः स्यादिति। तत्र भवान् कुशिको ऋषिः संपन्नः। तदेतदृष्यानन्तर्यं भवति। तत्रानृष्यानन्तर्य इति प्रतिषेधः संप्राप्नोति। नैष दोषः। नैवं विज्ञायते ऋष्यानन्तर्येण न भवतीति। कथं तर्हि। ऋषावनन्तरे नेति। यद्येवमनृष्यानन्तर्यवचनमनर्थकं। संज्ञागोत्राधिकारात् अनृष्यानन्तर्यवचनमनर्थकं किं कारणं। संज्ञागोत्राधिकारात्। संज्ञागोत्र इति वर्तते कः प्रसंगो यदनन्तरे स्यात्। नैव प्राप्नोति। नार्थः प्रतिषेधेन। एवं तर्हि सिद्धे सति यदनृष्यानन्तर्य इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः बिदादिषु येऽनृषयः पठ्यन्ते। तेषामनन्तरेऽपि वृत्तिर्भवतीति। किमेतस्य ज्ञापने प्रयोजनं। नानान्द्रः पौत्रः दौहित्र इत्येतत्सिद्धं भवति। वृत्तौ किमर्थमिदमुच्यते न गर्गादिभ्यो यञ्चित्येव सिद्धे लुक् स्त्रियामिति वक्ष्यामीति। यदि पुनस्तत्रैवोच्येत नैवं शक्यं आङ्गिरसयग्रहणं हि विच्छिद्येत॥ ॥ ॥ ॥

रसग्रहणमिति। तथा च सर्वत्र लुक् कस्मात्। योगविभागस्तर्हि किमर्थो न वृत्तौ शाह्नलुक् स्त्रियामित्येक योग एवोच्येत। आङ्गिरसे शिवाद्यणो बाधनार्थो योगविभागः। वृत्तौ गोनाम ऋषिः। तत ऋषिलादेवाणि सिद्धे शिवादिषु तस्य पाठो गोत्रे गर्गादियञ्समावेशार्थः। अनेन तु योगेनाङ्गिरसे प्रसंगे यञ्विधानादणो बाध्यते। आसत्रतु गोत्रे यञणौ द्वावपि भवतः। ऋषिलादेव च वृत्तौ शीस्त्रत्र च बष्यद्रू भवति॥ ॥ श्री०

= ननु शिवादिभ्यो गोत्र एवेष्यते इति नियमेन वारितार्थात् कथमपत्यग्रहणं विना विधिरत आह गोत्र इति ।१ =

शिवा° गोत्र इति निवृत्तं अपत्यमित्येवानुवर्तते अण् इति ननु मातृशब्दात् स्त्रीप्रत्ययान्तत्वात् कथं ठग् विहितः एवं तर्हि परिहारान्तराभिधानान्न विचारितमेतद्वा

शिवा° किमर्थं शिवादिभ्योऽण् विधीयते न यथाविहितमित्येवोच्येत शिवादिभ्यो यथाविहितमितीयत्युच्यमाने इञ् प्रसज्येत इञन्तो यथावि
हितः पुनर्वचनमिदानीं किमर्थं स्यात् येनास्य बाधकास्तद्बाधनार्थं सर्वे नास्ति यस्तं बाधेत तत्रारम्भसामर्थ्याद्यो विहितो न च प्राप्नोति स भवि
ष्यति कस्तावदसावण् एव उत्सर्गार्थं तर्हि अण् वृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्य इत्यत्र यथाविहितमितीयत्युच्यमाने ठक् प्रसज्येत ठगन्तो यथा
विहितः पुनर्वचनमिदानीं किमर्थं स्यात् येनास्य बाधकस्तद्बाधनार्थं सर्वे नास्ति यस्तं बाधेत तत्रारम्भसामर्थ्याद्यो विहितो न च प्राप्नो
ति स भविष्यति कः पुनरसावण् एव उत्सर्गार्थमेव हि तर्हि ऋष्यन्धकवृष्णिकुरुभ्यश्चेत्यत्र यथाविहितमितीयत्युच्यमाने इञ् प्रसज्येत इ
ञन्तो यथाविहितः पुनर्वचनमिदानीं किमर्थं स्यात् । येनास्य बाधकास्तद्बाधनार्थं सर्वे नास्ति यस्तं बाधेत तत्रारम्भसामर्थ्याद्यो वि
पत्न्याद्यास्ये इति पत्न्याध्वर्युपरिषदस्ये सत्रापमर्षे निर्देशः । पत्न्यादितिरथ्या यत्पत्न्यदर्वोदग्नित्रेतयोर्योगयोरर्थे निर्देशः सौवहित्रमिति तत्र दर्वेत्रासिद्धमिति ठत्वा
दीनामिदिकर्तव्ये सिद्धत्वात् चिदिरूपं आग्नीध्रमिति अग्निमिंध इति क्विप् अंतर्भावितण्यर्थत्वादिंधिस्सकर्मकः होताग्नीदुच्यते तस्य शरणमाग्नीध्रं भ
सेत्यया परसंज्ञाया बाधनाजत्त्वाभावः चरणादिति गोत्रचरणादिसत्रापमर्षे निर्देशः एकशेषनिर्देशा इति स्यादीनि सर्वैर्निर्देसमिति एकशेषः स्यादीनां पद्य

पत्न्याद्यास्ये पत्न्याद्यास्य इति वक्तव्यं आग्नंध्रं औष्ट्रं गार्द्दभं रथाद्यांगे रथाद्यांग इति वक्तव्यं आग्नरथं गार्द्दभरथं औष्ट्ररथं वहेस्तुरणिश्च वहे
स्तुरणचेतुक्तव्यः संबोढुः स्वसांवहित्रं आग्नीधः शरणे रंभं च आग्नीधः शरणे रञ्ञ्रत्ययो भसंज्ञा च वक्तव्या आग्नीधः शरणं आग्नीध्रं समिधा
माधानेषेण्यण्वक्तव्यः समिधामाधानो मंत्रः सामिधेन्यो मंत्रः सामधेनी ऋक् चरणाद्धर्माम्नाययोः चरणाद्धर्माम्नाययोरिति वक्तव्यं क
ठानां धर्म आम्नायो वा काठकं पैप्पलादकं तत्र हि देवदुव क्तव्यं सत्रं च भिद्यते यथान्यासमेवास्तु नेतुचोक्तं तस्येदमित्यसन्निहिते आप्रिरिति
किं इदमपि भवान्नस्य यार्थमेवोपात्तमतेन पुनः प्रकृत्यर्थमपि यथैव हि इदमिति तत्रास्य स्वेवर्त्तते एवं तदिति तत्सरोक्षे वर्त्तते । तेन इहैव स्यात्तस्ये
दमिति अस्य अमुष्य इस्तत्र न स्यात् अस्त्वत्र विशेषः एकशेषनिर्देशोत्र भविष्यति तस्य च अस्य च अमुष्य च तस्येति इहापि तर्ह्येकशेषनिर्दे
शो भविष्यति इन्द्वाद्वन्द्वे रमैथुनिकयोः वैरे देवासुरादिभ्यः प्रतिषेधः वैरे देवासुरादिभ्यः प्रतिषेधो वक्तव्यः दैवासुरं राक्षोऽसुरं ॥ ॥

तपरं तत्त्वविष्यतः इत्युक्तं पूर्वशेषदर्शनाच्चेत्युक्तमिति पूर्वे स्यापितरः शेषः सौत्रत्वाच्च निर्देशस्य एकवचनं विभक्त्यंतानां चैकशेषः एकशेषद्वारेणैवेतत्प्रतिपादयति
षष्ठ्यंतमात्रं प्रकृतित्वेन विवक्षितं तत्प्रतियोगिमात्रं च प्रत्ययार्थत्वेन प्रत्ययपरं लिंगसंख्याप्रत्यक्षपरोक्षादिकं तदविवक्षितं ॥ ॥ ॥

=अनंतरमिति शेषः।२=

=निर्देशस्य सौत्रत्वमावश्यकमित्याह विभक्तीति तेषामेकशेषस्य सत्त्वानास्त्वात्वादेकशेषोत्र सौत्रः।२=

×इदं च तदादस्य इदमित्येव पदस्युच्यते अनंतरादिषु प्रतिषेधो वक्तव्य ... रादिषु त्यादिर्न भविष्यति ×३

=एवं च परिगणनमपि न कर्त्तव्यमित्युक्तं भवति।१=

भा०कै०४ संघाङ्कघोषग्रहणमिति तेन घोषेऽपि प्रत्ययं सिध्यति वैषम्याच्च यथासंख्यं न भवति लिंगेति लिंगविहितप्रत्ययो लिंगशब्देनोच्यते रैवति अपाणिनीयं सूत्रेषु पाठ इ
१०३ साह कौपिंजलेति गोत्रवुञ्चि प्राप्ते णविधिः अस्मादेव निपातनादपत्यार्थे कुपिंजलहस्तिपाद शब्दाभ्यां मण् पादस्य पत् भावश्च। गोत्राधिकारात् गोत्रप्रत्ययान्तादिदं

संघांकलक्षणेषु संघादिषु घोषग्रहणं कर्त्तव्यं गार्गो घोषः वात्सो घोषः किमर्थो णकारः वृद्ध्यर्थः ञ्णितो निवृद्धिर्यथा स्यात् संघादिषु प्रत्य
यस्य णित्करणानर्थक्यं स्त्रीत्वात्प्रातिपदिकस्य। संघादिषु प्रत्ययस्य णित्करणमनर्थकं। किं कारणं। वद्धृत्वात्प्रातिपदिकस्य वद्धमेतत् प्रातिपदिकं
लिंग पुंवद्भावप्रतिषेधार्थं तु णकारः कर्त्तव्यः लिंगार्थं वैदी पुंवद्भावप्रतिषेधार्थं वैदी स्थूणाऽस्य वैदीस्थूणः वृद्धिनिमित्तस्येति पुंवद्भावप्रि
प्रतिषेधो यथा स्यात्। रैवतिकादिभ्यश्छः कौपिंजलहास्तिपदादण् कौपिंजलहास्तिपदाद एव कर्त्तव्यः कौपिंजलः हास्तिपदः आथर्वणिकस्येक
लोपश्च। आथर्वणिकस्येकलोपश्च एव कर्त्तव्यः आथर्वणो धर्मः आथर्वण आम्नायः इदमाथर्वणार्थमाथर्वणिकार्थं च चतुर्थग्रहणं क्रियते।
वसन्तादिषु आथर्वणशब्दः आथर्वणशब्दश्च पठ्यते षष्ठ्या यत्प्रकृतिभावार्थं ग्रहणं क्रियते इदं चतुर्थमिकलोपार्थं द्वितीयग्रहणं शाक्यमकर्त्तुं कथ्यते
नेमोक्त मिति प्रकृत्यकृषिभ्यो लुग्वक्तव्यः वसिष्ठोऽनुवाको विश्वामित्रोऽनुवाक इत्येवमर्थं ततो वक्तव्यं आथर्वणो वेत्तीति तेन प्रोक्तमथर्वा इत्या
थर्वणा इति च। अथ वसन्तादिष्वाथर्वणशब्दः पठितव्यः न तेनेवार्थः प्रकृतिभावार्थे न। नापि इकलोपार्थे न पठ्यते वसन्तादिष्वाथर्वणशब्दः पठ्यते

=संघोङ्कलक्षणेष्वञ्यञिञामण्णिति नियमस्तु न अस्मादेव प्रयोगात् १= ॥ अथर्वाणमधीते आथर्वणिक इति न सिध्यति॥ ॥ ॥ ॥

विधानं आथर्वणिक स्य एव कर्त्तव्य इति कौपिंजलहास्तिपदादणिसूत्रमपाणिनीयत्वात् ऋषिभ्यो लुगिति वसिष्ठादिशब्दसिद्ध्ये अवश्यं वक्तव्यो लुक् नन्वस
सत्विन सूत्रे आथर्वणिकानां धर्म आम्नायो वेत्यर्थे आथर्वणशब्देन सिध्यतीत्याह ॥ ॥ ॥ ॥

=वार्त्तिकस्यास्य सूत्रेनुवृत्तिर्दुर्लभेत्यत आह-कौपीति-इदम् पिवार्त्तिकमितिहदयम्।२=

तत्रेति यदेवाथर्वणप्रोक्तमाथर्वणं शास्त्रं तदेवाथर्वणिका नामाम्नायो न तु तेषामाम्नायांतरमाथर्वणशब्दवाच्यं धर्मस्त्वाथर्वणशब्देनाभिधास्यते नन्वेदानीमिति चरणात् धर्माम्नाययोरितिवचनादर्थांतरे प्रसंगाभावादिसर्थे तस्य विकारः श्रौषिकनिवृत्त्यर्थमिति विकारावयवयोर्मा भूवन्निसेवमर्थं तस्य ग्रहणमिसर्थः कथं चेति किमधिकारात् प्राप्नुवंति अथ तस्येदमितिवचनात् यद्यधिकारात् प्राप्नानां तस्य ग्रहणेन निवृत्तिः क्रियते तदा पुनरपि तस्येदमित्यनेन प्राप्नुवंति अथ तत्

=आम्नायवदितिचार्थप्रोक्तप्रत्ययांताथर्वण शब्दस्तादर्थ्यबोधकत्वं तथार्थवणिक शब्दस्यार्थाणाम्प्रस्यय...

नैष दोषः इहास्माभिर्द्वेधा ह्युत्पाद्यं। अथर्वाणमधीते आथर्वणमधीते आथर्वणिक इति। तत्र द्वयोः शब्दयोः समानार्थयोरेकेन विग्रहः अपरस्मादुत्पत्तिर्भविष्यति। अथ विकल्पन्यायेन। तद्यथाऽऽदेवेमौ समिति विग्रहः अविकशब्दादुत्पत्तिर्भवति। तत्रापि संबंधमात्रे कर्तव्यं आथर्वणिकानामिदमिति नचेदानीमन्यदाथर्वणिकानां स्वं भवितुमर्हति अन्यदतो धर्मो वा आम्नायो वा तस्य विकारः तस्येदमेवमाथर्वणमधीत इति विग्रह आथर्वणिक इति भविष्यति अथर्वाणमधीत इति विग्रहस्य वाक्यमेव ... तिवर्त्तमानेपुनस्तस्य ग्रहणं किमर्थम् तस्य प्रकरणे तस्य पुनर्वचनं श्रौषिकनिवृत्त्यर्थं तस्य प्रकरणे तस्येति पुनर्वचनं क्रियते श्रौषिकनिवृत्त्यर्थम् श्रौषिका निवर्त्तन्ते कथं च प्राप्नुवंति तस्येदंवचनात्प्रसंगः तस्येदं विशेषा ह्येते अपत्यं समूहो विकारो निवास इति॥ ॥

=निवृत्तिः॥

स्येदमित्यनेन प्राप्तानां तस्य ग्रहणेन निवृत्तिः क्रियते तदा सौनोपपद्यते उत्तरार्थत्वादस्य योगस्य तत्रैव चरितार्थत्वादिति प्रश्नः तस्येदंवचनादिति तस्य ग्रहणं घादिसंबंधस्य तस्य ग्रहणस्य निवर्त्तकं घादीनपि निवर्त्तयति तन्निवर्त्तनसामर्थ्यात् तस्येदमित्यनेनापि विकारावयवयोर्घादयो न भवंति अन्यथा तन्निवर्त्तनमनर्थकं स्यादिसर्थः प्राग्दीव्यत इत्यवधिविशेषाश्रयेणात्वणादीनामधिकारात् अणादयः इहसंबध्यंत इति विपर्ययो न चोदनीयः घादयोनुवर्त्तंतां अणादयो मानुवृतन्निति॥ ॥ ॥

=अथवा तस्य विकार इति विकारे पुनस्तत्र चरितार्थं ...=

घादी ३

भा०कै०४
१०४

किमर्थमिति सर्वेष्वेव सूत्रेष्वाक्षेपः बाधनार्थमिति तस्येदमित्यत्राणादयो घादयश्चाणाद्यपवादा विहिताः तत्र विकारावयवयोरणादय एव यथा स्युः न त्वपवादा घा
दयो माभूवन्नित्येवमर्थमिदमुच्यते येनेति अण इत्यर्थः कथं पुनरिति तस्येदमित्यस्मात् तस्य विकार इत्यस्य पृथग्निर्देशादनेन विधीयमानोऽणः प्रत्ययोऽशैषिकः
कथं विकारे प्राप्तान् बाधत इति प्रश्नः उत्सर्ग इति असत्यस्मिन् पृथक्सूत्रे विकारोऽपि तस्येदमित्यत्रान्तर्भावाच्छेषो भवतीति घादयः प्राप्नुवन्ति उत्सर्गत्वे वि
कारस्य प्रकृतिविशेषसंबंधात् सति हि योगविभागे विल्वादिभ्योऽण् विकार इति वक्तव्यं तत्र प्रकृतिविशेषसंबंध एव विकार उपयुक्तत्वादशेषः स्यात् प्रकृ
तिमात्रसंबंधस्त्वनुपयोगाच्छेष एव स्यात् सति तु योगविभागे विकारस्याविधावुपयोगादशेषत्वात् घादीनामप्राप्तिः अप्राप्तमनुमानमेव बाध्यं इति

किमर्थमिदमुच्यते बाधनार्थं कृतं भवेत् येतस्य बाधकास्तद्बाधनार्थं कथं पुनरशैषिकः शैषिकं बाधते उत्सर्गः शेष एवासौ योऽप्युत्सर्
गः सोऽपि शेष एव के पुनः शैषिकाणां विकारावयवयोः प्राप्नुवन्ति यावता सर्वे मद्यापवादैर्व्याप्तं इह न किंचिदुच्यते हलसीराट्ठगिति कथं पु
नरिच्छतापवादः प्राप्नुवंश्छक्यो बाधितुं तस्यग्रहणसामर्थ्यात् किमिदं भवानध्याहरति तस्यग्रहणस्यैव प्रयोजनमाह न पुनः सर्वेष्वेव
योगेष्वनवकाशमुत्तरार्थोऽयं निर्देशः कर्तव्यः तस्मादर्थे विभक्तिरपि तर्ह्येवं वश्यमुत्तरार्था निर्देष्टव्या॥ ॥ ॥ ॥

भाष्ये के पुनरिति शैषिकाणामिति निर्धारणे षष्ठी अपवादैरिति वक्ष्यमाणैरणादिभिरित्यर्थः हलसीरादिति हलशब्दो न द्विविषयस्यानिसं तस्येत्याद्युदात्तः सीरशब्दो
पिक्रन्नन्तोनित्वात् ततश्चैताभ्यां विकारे न कश्चिदत्रापवादोऽस्तीति ठक् वाधित्वाणेवं भवेतिहाल्लं सैर इति कथं पुनरिति हलसीराट्ठगित्यस्य यमाण एवापवादः कथमसौ
वश्यकोऽवाधितुं योगस्तूत्तरार्थ एव स्यादिति प्रश्नः तस्यग्रहणसामर्थ्यादिति बाधनार्थाद्रणः पुनर्विधानादित्यर्थः तस्यग्रहणमेवानन्यार्थमिति तत्सामर्थ्या
दित्युक्तं इदमर्थाद्विकारस्योत्सर्गो बाधकबाधनार्थ एवेत्यर्थः॥ ॥ ॥ ॥

प्रम०
१०४

=नन्वारंभसामर्थ्यादेव बाधो भविष्यतीत्यत आह योगस्त्विति॥२॥ = ननु संपूर्णस्य सूत्रसामर्थ्य [illegible] भावः अर्थनिर्देशस्तूत्तरार्थ इति बोध्यं तत्फलितमाह दृश्यते आदि॥१॥

=एतेन मयडुत्सर्ग इत्यत्र षष्ठी न लुप्यत इत्युक्तं ॥३॥= ननु नित्यं वृद्धेति मयट् पश्चादपवादत्वात् संभवात् कथमुत्सर्गत्वमत आह । अप्राणीति । शैषिकाणां मे तयोरर्थयोः प्राप्तेरिति भावः ॥३॥=

अवयवे चेति ॥१

नवेति घ्रादीनां प्राधान्यात्तस्य ग्रहणो गुणे प्राप्ते अनेन निवर्त्तमानेऽपि निवृत्तिर्न शक्यते प्रतिपादयितुं नहि गुणानुयायि प्रधानं भवति । अवयवे चेति घ्रादीनां निवृत्तत्वादप्राण्यो-
षधिवृक्षेभ्यो प्रसंग इत्यर्थः । पाटलिपुत्रका इति पाटलिपुत्रस्यावयवा इति तस्येदमित्यत्रार्थे रोपधेतोः प्राचामिति वुञ् मयडुत्सर्गादिति मयडुत्सर्गः शैषिके-
षु निवृत्तेषु सामान्येन विधानमित्यर्थः । अश्मन् एवं वृद्धाच्छेति संबद्धेति मयडारंभात् । अनुवृत्तादेरित्ययमत्र अवृद्धेषु वृद्धतार्थस्तत्वाविशेषादत्र मयटो-

=बाध्यसामान्यचिंतायेत्यर्थः ॥३॥=

प्रकृता समर्थविभक्तिरनुवर्त्तते तस्येदमिति नवा संप्रत्ययः । नवा संप्रत्यय इत्यतः सूत्रेण शैषिकाणां निवृत्तेः । नहि काकोवाशपत इत्ये-
वमधिकारा निवर्त्तन्ते यदि त्वल्पविविकारावयवयोः शैषिका नेष्यन्ते महता सूत्रेणानिवृत्तिर्वैकल्प्या अवयवे चाप्राण्योषधिवृक्षेभ्यो ॥
निवृत्तिः अवयवे अप्राण्योषधिवृक्षेभ्यो ॥ निवृत्तिरिशात तत्र च निवृत्तिः प्राप्नोति पाटलिपुत्रकाः प्रासादाः पाटलिपुत्रकाः प्राकारा इति
अणमयटोर्विप्रतिषेधानुपपत्तिर्मयडुत्सर्गात् अणमयटोर्विप्रतिषेधो नोपपद्यते पठिष्यति हि विप्रतिषेधं अणो वृद्धा-
न्मयडिति [illegible] किं कारणं म-
यडुत्सर्गात् निवृत्तेषु हि शैषिकेषु वृद्धान्मयडुत्सर्गः तस्याणपवादः उत्सर्गापवादयोश्चायुक्तो विप्रतिषेधः अनुवृत्तौ हि छोत्स-
र्गापवादविप्रतिषेधान्मयट् अनुवर्त्तमानेषु हि शैषिकेषु वृद्धाच्छ उत्सर्गः तस्याणमयटावपवादौ अपवादविप्रतिषेधान्मयड् विप्र
कोपधाच्चेत्ययमपवादोऽणिति शाक्रमयमित्यत्र मयणन लभ्यत इत्यर्थः । अपवादविप्रतिषेधादिति शाकशब्दाच्छापवादयोरणमयटोः परत्वान्मयट् सि-
द्ध इत्यर्थः इदानीं भाष्यकारः सूत्रेणैव शेषसिद्धिं प्रतिपादयितुमाह ॥ ॥७॥ ॥ श्री ॥

=एवं चापवादत्वेन समत्वाद्विप्रतिषेधोपपत्तिरित्यर्थः ॥९॥=

मो०कौ०४
१०५

यत्तावदिति इममिति घादीनामिह निवृत्तत्वादयमण् निरपवादः घाद्यनुवृत्तौ हि योगविभागेन यत्नः स्यात् तस्येदमित्यनेनैव विकारेऽप्यण् घादीनां घादीनां च सिद्धत्वात् तत्रेति यथा हलसीरात् ठगिसत्तिप्राप्ते ठग्विधीयमानो द्वितीयो भवति तमपवादत्वादयमण् बाधते तृतीयकृत्प्राप्तः येत्ततीया इति तृतीयस्थानप्राप्तत्वादस्याण् स्तत्स्यकृत्स्यत्वात् परत्वात् बाध्याः यथा हजीनां विकार इति तस्येदमित्यण् प्रथमः अवृद्धादपीति वुञ् द्वितीयः मयड्वैतयोः कन्तितित् तृतीयोनेन बाध्यते वाजइति इजि शवृत्सप्रि ट् तत्रेषु विकल्पेनानोत्सर्गत्वविधानात् पक्षे आद्युदात्तत्वादण् पक्षेनुदात्तादेश्चेत्यञ् येच तुर्या इति यथा त्रिगर्तानां विकार इत्रैगर्त इति त्रिग

यत्तावदुच्यते नवासंप्रत्ययइत्यता सूत्रेण शैषिकाणां निवृत्तेरिति संप्रत्ययएव नस्यात्तावदुत्सर्गः सिद्धोऽणस्तस्येदमित्येव सोऽयं पुनस्तस्य ग्रहणेन तस्य सापवादस्याणः प्रसंगे इमं निरपवादकमणं प्रतिपादयति तत्र ये तावद्द्वितीयास्तान् प्राप्तत्वात् बाधिष्यते येत्ततीयास्तान् परत्वात् येच तुर्यास्तत्रके चित्सुरस्ताद् पवादाद्ञनेत अणिविधीन्बाधंते इसेव मिमं न बाधिष्यंते केचिन्मध्ये पवादाः पूर्वान् विधीन्बाधंत इति एतावंत श्चैवतेस्युः यदुत द्वितीयास्तृतीयाश्चतुर्थावा पंचमानषष्ठाः॥ ॥ ॥ ॥

तेन शास्त्रेबहुव्रीहिः पूर्वेपरप्रकृतिस्वदेशांतोदात्तः। अत्राण् प्रथमः जनपदलक्षणो वुञ् द्वितीयः गर्त्तोत्तरपदलक्षणः छस्तृतीयः॥ तद्वृद्धियहणाविहितो वुञ् चतुर्थः केचिन्मध्य इति यथा रंकूणां विकारो रांकवइति अत्राण् प्रथमः तदपवादयोरहृद्धादपीति अत्रो ठञ्जितिवुञ् ठञ् स्तत्स्यकृत्स्ययोरन्यतरो द्वितीयः ततः कोपधादिति बाकछीणस्तृतीयः मनुष्यतस्य योर्वुञ् इति च तुर्थः पूर्वमेवाणं बाधते ततविकाराणं बाधते तेनैव तत्परत्वाद्वुञ् बाध्यते। ततः उरज्जिसत्ति प्राप्ते कोपधाच्चेत्यण् प्रतिप्रसूयते नपंचमा इति शैषिका इति शेषः। अत्र यथा प्राकृषो विकारः प्राकृणमय इति मयडेस्य वा अत्राण् प्रथमः तदपवादः कोत्ताद्रुञितिद्वि
तीयः ऋत्वणस्तृतीयः प्राकृषणमय इति च तुर्थः विकाराणपंचमः नित्यंवृद्धेति मयट् षष्ठो भवति॥ ॥

एम०
१०५

दिपाठाधा२

यदपीति 'अवयवे च प्राण्योषधिवृक्षेभ्य' इति प्रकृतिविशेषाद्विधीयमानोऽण् तस्मादेव शेषिकाणां बाधको न तु प्रकृत्यंतराणां स्वयमेवाभावादित्यर्थः 'अन्नमिति' ञ्यरअन्न-
नुदात्तादेश्चेति सूत्रद्वयविहितं क्रोपधाच्चेत्यणा बाधिष्यते न तु मयटं मयटैव तु परत्वादणा बाधि इत्यर्थः 'अवयवे' कृतनिर्देशो ह्येतावितिं यद्यपि शेषिकनिवृत्त

×वृक्षेभ्यो निवृत्तिरिति प्राण्योषधि×१

यदप्युच्यते अवयवे चा प्राण्योषधिवृक्षेभ्यो निवृत्तिरुच्यते तत्र कः प्रसंगो यदप्राण्योषधिवृक्षेभ्यो निवृत्तिः स्यात् यदप्युच्यते प्राण्यप्रयो
श्च विप्रतिषेधानुपपत्तिर्मयडुत्सर्गादिति माभूद्विप्रतिषेधः पुरस्तादपवादाः इति न तराणि विधीन्बाधंत इत्येवमणाऽनं बाधिष्यते मयटं न
बाधिष्यते अवयवे च प्राण्योषधिवृक्षेभ्य किमर्थं विकारावयवयोर्युगपदधिकारः विकारावयवयोः कृत्स्नमुक्तं तत्र तावदुक्तं भक्ष्या
च्छादनयोर्युगपदधिकारोऽपवादविधानार्थः कृतनिर्देशौ हि तावितिं इहापि विकारावयवयोर्युगपदधिकारोऽपवादविधानार्थः कृतनिर्दे
शौ ह्येतावयौतस्येदमिति बिल्वादिभ्योऽण् किमर्थं बिल्वादिषु गवीधुकाशब्दः पठ्यते नकोपधादणित्येव सिद्धं बिल्वादिषु गवीधुकाग्रह
णं मयट्प्रतिषेधार्थं बिल्वादिषु गवीधुकाग्रहणं क्रियते मयट्प्रतिषेधार्थं मयड्मा भूदिति अनुदात्तादेश्च अनुदात्तादेरञो विधान
आद्युदात्तात्ङीष उपसंख्यानं अनुदात्तादेरञो विधाने आद्युदात्तात्ङीष उपसंख्यानं कर्तव्यं कुवली कौवलं बदरीवादरं ननु हि वक्तव्यं

=मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोरिति प्राप्तस्यापवादत्वप्रकृतिकङीबंतादित्यर्थः ॥१२ १ नवक्तव्यं विनिघातेऽनुदात्तादेरित्येव सिद्धं न सिध्यति किं कारणं ॥ ॥

यत्तमुक्तं तथापि तदन्तेपेक्ष्यक्व चिन्नावदारणात्यस्मिन्द्रदाः भाष्य नेमान्निकमिसादावित्यमिसंबंधायेत उक्तं 'अनु' कुवलीति' कुवलबदरशब्दौ ग्रामादीनां चेत्याद्यु
दात्तौ ताभ्यां गौरादित्वात् ङीष् ॥ श्री ॥७॥ ॥७॥ ॥

=तदन्तेपेक्षेति यथासामान्यविधाने विस्वमेलादिषु वृक्ष्या अभिधानकृत्लिकान्यानभिधानादेवपादानां विकारावयवयोरनावइतिनरनपेक्षेतिभावः ॥१२

परस्येति अनुदात्तं पदमेकवर्ज्जमिति वचनादिह चानुदात्तादिग्रहणस्य ङ्याप्प्रातिपदिकविशेषणत्वात् पयोक्तं ह्रस्वान्तह्रस्वावर्णस्वरव्यञ्जनलक्षणो च प्रत्य
यविधौ तदन्तप्रत्ययार्थमिति नचेति विभक्त्युपसंज्ञो सत्यामवन्तस्यानुदात्तादित्वमभ्युपगतेन च ह्रस्वान्ते ङे तदनेन विरोधः समर्थावयवस्य ङ्याप्प्रातिपदिकस्य
ह्रस्वादिविशेषणत्वेनाश्रयणात् एतद्धीति सावेकाच इति विभक्तेरुदात्तत्वात् प्रातिपदिकयोस्तु धातुस्वरेणान्तोदात्तत्वं। सर्वशब्दस्य सर्वस्य सुपीति

पदस्याद्यनुदात्तादित्वं पदस्य हि विनिघातः स चान्तं च पदं ङ्याप्प्रातिपदिकाच्च प्रत्ययो विधीयते नवा समर्थस्यानुदात्तादित्वात् नवा
कर्त्तव्यं किंकारणं समर्थस्यानुदात्तादित्वात् समर्थमनुदात्तादित्वेन विशेषयिष्यामः नैवं शक्यं इह च प्रसज्येत वाचो विकारस्त्वचो वि
कार इसेत द्धि समर्थमनुदात्तादि इह च न स्यात् सर्वेषां विकार इति तस्मान्नैवं शक्यं न चेदेवमुपसंख्यानं कर्त्तव्यं नकर्त्तव्यं आचार्यप्रवृत्तिर्ज्ञापय
ति यावत्सेव द्वितीयस्य स्वरस्य प्रादुर्भावस्तावत्सेव पूर्वस्य विनिघात इति। यदयं भिक्षादिषु गर्भिणीशब्दस्य पाठं करोति कथं कृत्वा ज्ञापकं भि
क्षादिषु गर्भिणीशब्दस्य पाठ एतत्प्रयोजनमनुदात्तादिलक्षणो मा भूदिति यदि च पदस्य विनिघातः गर्भशब्दोयमाद्युदात्तः तस्मादिन्नन्ता
यः प्रत्ययः प्राप्नोति सतावत्स्यात् तस्मिन्नवस्थिते विनिघातः तत्र कोनुदात्तादिलक्षणस्यावकाशः प्रसंगः। पश्यति त्वाचार्यः। यावत्सेव द्विती
यस्वरस्य प्रादुर्भावः तावत्सेव पूर्वस्य निघात इति अतो भिक्षादिषु गर्भिणीशब्दं पठति पदग्रहणं किमर्थं पदग्रहणं परिमाणार्थं पदग्रह
णं क्रियते परिमाणार्थं वा कस्य मा भूत् अनुदात्तं पदमेकवर्ज्जमिति॥ ५
सुप्याद्युदात्तः। केवलस्तत्वयमुणादिष्वन्तोदात्तो निपातितः इस नुदात्तादिः। तस्माद्विभक्त्युत्पत्तेः प्रागनुदात्तादित्वमाश्रयणीयं पूर्वस्य निघात इति प्रागप्यव
स्थितं तस्य निघात इत्यर्थः गर्भशब्द इति अग्निग्रहणं मन्त्रित प्रत्ययस्य नित्वात् पदग्रहणमिति यस्य पदत्वं भविष्यति तस्यैवैकवर्ज्जमनुदात्तत्वं यथा स्यात्।

=पदेवेत्यर्थः।४=
=सामर्थिकेनानुदात्तादेरनिष्टेन·३
=तस्मिन्निति·पूर्वमवस्थितो हि यः पदत्वप्रयोजकः स प्रत्ययस्तावत्प्रथमं ततो निघात इति सुसत्तेः सर्वस्य नित्यानुदा=
=त्तादित्वाभावान्नोपादिति इत्यर्थः।=२=
=अन्त्याद्युदात्तादिविषये परस्यापि निघातदर्शनात्सर्वस्य निघात इत्युक्तमत आह·प्रागिति·३=

=नन्वसंभाएयोरवधिहृतातामवाद्धिंत्स मिदमिति तिनन्नः आणितारोपेणरक्षनेहिलाभयात् २=

मयट् किमर्थमिति विकारावयवयोः प्रकृतत्वादेवेति भावः मयडिति एतयोरिति तस्मिन्सति पुनर्विधानं मयटो भवति तच्चापवादविषयेऽपि मा भूदित्यर्थं संपद्यते योगयो
र्द्वैति योगयोः प्रत्यययोर्वा विषये मयडित्यर्थः नित्यस्तु तत्र स्यात् तयोर्विकारावयवयोर्नित्यं प्रत्ययः तदन्तात् विकारावयवयोरेव नान्यत्र भवतीति सूत्रार्थः किमर्थमिति
सूत्रान्तरेणापि सूत्रे सिद्धिं मत्वा प्रश्नः विकारावयवयोरिति कपोतस्य विकारोऽयत् मांसं कापोतं तस्यापि विकारे सोऽभवति कपोतावयवस्य सक्थ्यादेः कापोतस्यावय

=पत्येषऽहन्निरितियावत् तयोरुदाहरति बिल्वमयमित्यादि २ =योगयोरिति पलाशादिभ्यो वा शम्याष्ट्लञ् इत्यनयोः प्रत्यययोर्वेति अर्थः २=

मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः किमर्थं मयड्वैतयोरित्युच्यते मयड्वैतयोर्वचनमपवादविषये निवृत्त्यर्थं मयड्वैतयोरित्युच्यते अपवादवि
षये निवृत्तिर्यथा स्यात् बिल्वमयं बैल्वं एतयोरित्यर्थे निर्देशो द्रष्टव्यः तद् द्रष्टव्यं विजानीयात् योगयोर्वा प्रत्यययोर्वेति तत्राचार्यः सुहृद्भूत्वा
चष्टे एतयोरित्यर्थे निर्देश इति नित्यस्तु तत्र स्यात् [illegible]
[illegible] किमर्थमिदमुच्यते विकारावयवयोर्विकारावयवयुक्तत्वान्मयट् प्रतिषेधार्थं नित्यस्तु त

विकारावयव ८

त्रस्यादन्यो विधानं विकारो विकारेणायुज्यते अवयवेनावयवः विकारावयवयोर्युक्तत्वान्मयट् प्राप्नोति इष्यते चात्रैव स्यादिति तं चान्तरेण
यत्नं न सिध्यतीति मयट् प्रतिषेधार्थं नित्यस्तु तत्र स्यादन्यो विधानं एवमर्थमिदमुच्यते न वा दृष्टो ह्यवयवे समुदायशब्दो विकारे च प्रकृतिशब्दस्त
स्मान्मयड्भावः नैवैतत्प्रयोजनमस्ति किं कारणं दृष्टो ह्यवयवे समुदायशब्दः तद्यथा पूर्वे पञ्चालाः उत्तरे पञ्चालाः तैलं भुक्तं घृतं भुक्तं शुक्लो
नीलः कृष्ण इति विकारे च प्रकृतिशब्दो दृश्यते तद्यथा शालीन्भुङ्क्ते मुद्गैः शालिविकारं मुद्गविकारैरिति तस्मान्मयड्भावः तस्मान्मयड
वान्यो भवतीति हृदत्वात् मयट् प्रसंगे तन्निवृत्त्यर्थमन्यविधानमित्यर्थः नवेति परा कपोतावयवस्य सक्थ्यादेरवयवो विवक्ष्यते तदा कपोतशब्दादेव सक्थ्या
द्यवयववृत्तेरन्यं भविष्यति कपोतविकारमांसवृत्तेस्तु कपोतशब्दात् मांसविकारे स इत्यर्थः ॥ ॥ ॥७॥ ॥

=निसंहृदेति २

तेनेति मयटः कापोतमयमिति विकारावयवयोः प्रयोगाभावादित्यर्थः तस्मादिति यद्यनभिधानं नाश्रीयते तदा त्रित इत्यतत् प्रत्ययादिति सूत्रमपनीयवै
ल्वमयादिनिवृत्त्यर्थं तत्प्रत्ययाल्लुगिति वक्तव्यं अन्यत्रेति गोश्च पुरीष इति विकारप्रत्ययस्य समर्थनते। यदा तु पुरीषं नावयवो न विकारः तदा गोर्मयट् त

= विकारावयवप्रत्ययान्तःकापोतपदः १ =

नैतद्विवदामहे अवयवे समुदायशब्दोस्ति। नास्तीति विकारे वा प्रकृतिशब्द इति किं तर्हि विकारावयवशब्दोप्यस्ति तत उत्पत्तिः प्रा
प्नोति। विकारावयवशब्दात्प्रसंग इति चेत् न तेनाभिधानात् विकारावयवशब्दात्प्रसंग इति चेत् तन्न किं कारणं तेनानभिधानात्
नहि विकारावयवशब्दादुत्पद्यमानेन प्रत्ययेनार्थस्याभिधानं स्यात् अनभिधानात् उत्पत्तिर्न भविष्यति तच्चावश्यमनभिधानमा
श्रयितव्यं अभिधाने ह्यन्यतोपि मयट् प्रसंगः अभिधाने सत्यन्यतोपि मयट् प्रसज्येत बैल्वस्य विकार इति तस्मात्तत्प्रत्ययान्ता
ल्लुग्वचनं तस्मात्तत्प्रत्ययान्ताल्लुग्वक्तव्यः यदि लुगुच्यते कथं गोमयं भस्म। द्रोणवपमानं। कापिस्थो रस इति अन्यत्र गोम
याद्रुवयात्फलाच्च लुग्वक्तव्यः इहतर्हि औष्ट्रकीत्र्यंत्रादितीकारो न प्राप्नोति॥ इष्टमेवैतत्संगृहीतं ॐ ष्ट्रिके त्येव भवितं

= कपित्थशब्दात्फले विकारे तिनस्य लु
= किलपाणितमध्योक्तत्वात्फलया
= चितो नुग्वक्तव्य देवि लक्ष्म ३ =

((त्यं इहहि सौनागाः पठंति वुञ्श्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोनन्तत्प्रसंग इति॥ " ॰

त्प्रत्यय एव न भवतीति लुकः प्रसंग एव नास्ति। द्रुवयशब्दो द्रोर्विकार इति मानेवय इति वयप्रत्ययान्त एतास्यामनुदात्तादिलक्षणो त्र औष्ट्रकीति हृद्रुलक्ष
णस्य मयटो लुकि कृते अंतत्वाभावादीकारप्रसंगः वुञ्छेति पाणिनीयलक्षणो दोषो द्रावनमेतत्र॥ " "

= चेतकं हीयेत्रियत्रौष्ट्रकं ३ =

पालाशीति पलाशस्य विकारः पलाशादिभ्यो वेति पक्षेऽनतः तद्धिकारे मयटोऽलुक्कीकाराद्यप्रसंगः याणिनी पलाशाणि लत्वे तादन्निसती कारः सिध्यति
काशकृत्स्नेनेति अणंतस्याद्रियामध्ये आमनुपसर्जनत्वादीकारप्रसंगः तस्मादिति यस्मात्तु क्रिपालाशीति न सिध्यति तस्मादनभिधानान्मयटोऽनुप
जिराग्रथितयाऽऽकेषांचिनुयंथः नैषदोषः अध्ये आमभिधेयायामणि ईकारेणाभवितव्यं यस्मादाध्ये आंकेनेतलुप्रसक्तः यश्च श्रूयते उत्पन्नस्तस्माद्रीका
रः अथवा पुनरस्तु न तेनानभिधानादिति अनेन यद्यपि काशकृत्स्नापरिहृता तथाप्यापिशलानपरिहृता भवति। पालाशपापिशलेन संवदे

इहतर्हि पालाशी समिदित्यनुपसर्जनलक्षण ईकारोऽनमाप्नोति माभूदेवं अत्र योऽनुपसर्जनमिति अन्तंतादनुपसर्जनादि
त्येवं भविष्यति नैवं शक्यं इहहि दोषः स्यात् काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी तामधीते काशकृत्स्ना ब्राह्मणीति अणंतादि
तीकारः प्रसज्येत तस्मादस्तु न तेनानभिधानादित्येव इहतर्हि कापोतो रस इति प्राणिप्रशृत्तो नोपपद्यते नैषदोषः इदं तावदयं प्र
ष्टव्यः अथ योऽसावाद्येः कपोतः सलोमकः सपक्षः न च संप्रति प्राणीति। कथं तत्र प्राणिशब्दो वर्तत इति अयमतमेतत्प्रकृत्यन्वया
"विकाराभवं नीति इहापि न दोषो भवति॥ ॥ ॥

नेतस्मादस्तु न तेनानभिधानादित्येषपाठो युक्तः इहतर्हीति उक्तं प्राणिमांसे प्राणिवाचिनः कपोतशब्दस्य वृत्तिः सत्संप्राणिवाचित्वाभा
वाद्रसे मांसविकारे कापोतशब्दो न सिध्यतीति चोद्यं कथं तत्रेति तत्रापि लोके कपोतशब्दो दृश्यत इति प्रश्नः प्रकृत्यन्वया इति प्रकृतेर
न्वयो येषु ते प्रकृत्यन्वयाः प्रकृतिरेव विकाररूपतामापद्यमाना विकारावस्थायामपि प्रकृतिशब्देनाभिधीयत इत्यर्थः॥ ॥ ॥

=प्राणित्वाभावात्प्राणिरजतादिभ्योऽञिति प्राप्ते इति भावः।२८

क्रीतवत्प्रत्ययमात्रमिति मुद्गैः क्रीतं मौद्गिकमिति क्रीते ठग्विहित इति सूर्पस्य विकार इत्यत्रापि प्राप्नोति प्रकृतिमात्रादिति सूर्पादञन्यतरस्यामित्यत्र ठञौ हल्ल
स्य विकार इत्यत्रापि प्राप्नुतः अङ्गं चेति कालेभ्यो भववदित्यत्र यदुक्तं सिद्धं तु भयनिर्देशादिति तद्वाने न प्रतिपाद्यते अङ्गग्रहणेन प्रत्ययस्य परिमाणमेव
गृह्यते। तेनायमर्थो भवति। क्रीतार्थेभ्यः परिमाणं अङ्गं यथा च परिमाणात्प्रत्ययः तथा विकारेऽपि परिमाणं अङ्गं प्रत्ययश्च तेन यस्मात्परिमाणात् क्रीते

क्रीतवत्परिमाणात्। कथमिदं विज्ञायते क्रीते ये प्रत्यया विहितास्ते भवन्ति परिमाणाद्विकारावयवयोरिति आहोस्वित्परिमाणात्क्रीते ये
प्रत्ययास्ते भवन्ति विकारावयवयोरिति किं चातः। यदि विज्ञायते क्रीते ये प्रत्यया विहितास्ते भवन्ति परिमाणाद्विकारावयवयोरिति प्रत्यय
मात्रं प्राप्नोतीति अथ विज्ञायते परिमाणात्क्रीते ये प्रत्यया विहितास्ते भवन्ति विकारावयवयोरिति प्रकृतिमात्रात्प्राप्नुवन्ति तस्मात्क्रीत
वत्परिमाणादङ्गं च अङ्गं च क्रीतवदिति वक्तव्यं तत्र हि वक्तव्यं न वक्तव्यं क्रीतवदिति वति निर्देशोऽयं यदि च यात्पः प्रकृतिभ्यो येन वि
शेषणेन क्रीते प्रत्यया विहितास्ताभ्यस्तेनैव विशेषणेन परिमाणाद्विकारावयवयोर्भवन्ति ततोऽमी क्रीतवत्कृताः स्युः अथ हि प्रकृ
तिमात्राद्भवन्ति [illegible] प्रत्ययमात्रं वा स्यात्तन्नामी क्रीतवत्कृताः स्युः॥ ॥ ॥

यः प्रत्ययः तस्मादेव स एव विकारेऽपि भवति न वक्तव्यमिति क्रीते परिमाणादिति सेवाम्यतरविशेषणात्वे परिमाणस्य सिद्धे भवति निर्देशात्सर्वसादृश्यपरिग्र
हार्थादुभयविशेषणं परिमाणग्रहणमर्थाद्भवतीत्यर्थः॥ ॥ श्री ॥ ॥ ॥ ॥ ॥

=अन्यतरेति- क्रीते ये परिमाणाद्विहिता [illegible] स्ते भवन्तीति वा क्रीते ये विहितास्ते परिमाणाद्भवन्तीत्यर्थः।१८

अणा इति कोपधाच्चेति विहितात् कौवलमिति कुवल्या विकार इत्यर्थेऽण् मयटः स एवेति काष्ठमयमिति काष्ठशब्दस्याद्युदात्तत्वात् आम्रमयमिति अमि
नम्यो दीर्घश्चेति रक्प्रत्ययान्तो नुदात्तादिः गार्ध्रमिति गृध्रस्य विकार इत्यर्थः नवेति ओरञोनुदात्तादेरञ्चेत्युभयप्राप्तौ विप्रतिषेधः तन्निराकरोति यद्यनुवर्तेत इति
तस्य विकार इत्यत्र शैषिकाणामनुवृत्तौ छेप्राप्ते मयडारम्भसामर्थ्यात् पूर्वको भवतीति छस्येवाञो पि बाधक इत्यर्थः एतच्च बाध्यसामान्यचिन्तायां येन

आणोवृद्धान्मयट् अणोवृद्धान्मयड्विसेनद्भवति प्रतिषेधेन आणो वकाशः तैत्तिरीकं तैत्तिरीकं मयटो ऽवकाशः काष्ठमयं इहोभयं प्राप्नोति शाक
मयं ओरञोनुदात्तादेरञ्च ओरञो नुदात्तादेरञ्च मयड्भवति विप्रतिषेधेन ओरञो वकाशः आरडु आरडवं मयटः स एव इहोभयं प्रा
प्नोति दारुमयं अनुदात्तादेरञ् भवती तस्यावकाशः कौवलं जारदृक्षं जारदृक्षं मयटः स एव इहोभयं प्राप्नोति आम्रमयं मय
टः प्राण्यञ् विप्रतिषेधेन मयटः प्राण्यञ्भवति विप्रतिषेधेन प्राण्यञो वकाशः गार्ध्रं गार्ध्रं मयटः स एव इहोभयं प्राप्नोति चाषं
भासं। प्राण्यञ्भवति विप्रतिषेधेन नवा ऽनवकाशत्वादपवादो मयट् नवैष युक्तो विप्रतिषेधः योयमञो मयटश्च। किं कारणं अनव
काशत्वादपवादो मयट् अनवकाशो मयट्० सावकाशमञं बाधिष्यते सकथमनवकाशः यद्यनुवर्तते शैषिकाः अथ निवृत्ताः शै
षिकाः वृद्धमाद्युदात्तं मयटो वकाशः प्राण्यञ्च० अयं वाप्ययुक्तो विप्रतिषेधः योयं मयटः प्राण्यञ्च किं कारणं अनवका
शत्वात् अपवादो मयड्विसेव अनवकाशो मयट् सयथैव ओरञमनुदात्तादेरञं च बाधते एवं च प्राण्यञमपि बाधेत॥ ॥

नप्राप्त इति न्यायस्यानवकाशे तन्न्यायानपेक्षयोऽस्त्येति तन्निवृत्तौ विध्यंतरपूर्वको मयट् न भवतीति काष्ठमयादौ सावकाशः परत्वादेवाञं बाधते =
न त्वपवादत्वादित्यर्थः प्राण्यञ्च्चेति पूर्वविप्रतिषेधाभावे पीष्टसिद्धिर्भवत्येव दारुमयमाम्रमयमिति प्राण्यञ्जितु तदभावे चाषंभासमिति छेन सिद्ध्यति मयट्प्रसंगा =८

१०

=नतुर्दृ[illegible]वान्किंनैवयथेष्टं व्यर्थमनस्तानोदिशोवर्त्यथानि सर्वत्रेतिः२

तस्मादिति निसंहृद्भृशाणादिभ्योऽप्राणिन इति वक्तव्यमित्यर्थः यथेतद्दस्तीति यथेतद्दाश्रीयत इत्यर्थः मानुवृत्तन्त्रिति हन्तेर्घुम्भ्यो लुङीति वा परस्मैपदं पुषा
दिद्युताद्ीति च्लेरङादेशः शैषिकाणां निरूसनुद्सोरपि विप्रतिषेधोपपसाम यटापरत्वात् कोपधलक्षणो णवाध्यत इत्यर्थः जरद्धृक्ष इति जरद्धृक्षशब्दः
समासस्वरेणान्तोदात्तत्वादनुदात्तादिः स एवेति गार्ध्रमिति कपोतशब्दो लघावन्त इति मध्योदात्तत्वादनुदात्तादिः सापवादक इति मयटापरत्वात्बाध्य

तस्मान्मयड्विधाने प्राणिप्रतिषेधः तस्मान्मयड्विधाने प्राणिभ्यः प्रतिषेधो वक्तव्यः सत हि वक्तव्यः न वक्तव्यः मध्येऽपवादाः पूर्वा
न्विधीन्बाधन्त इत्येवमयं मयड् अञ्रजमनुदात्तादेरञं च बाधिष्यते प्राणिरञं न बाधिष्यते यथेतद्दाप्तिः मध्येऽपवादाः पु
रस्तादपवादा इति मानुवृत्तन्शैषिकाः पुरस्तादपवादा अनन्तरान्विधीन्बाधन्त इत्येवमयमणम् अञं बाधिष्यते मय
डं न बाधिष्यते अनुदात्तादेरञः प्राणिरञि प्रतिषेधेन अनुदात्तादेरञः प्राणिरञ् भवति विप्रतिषेधेन अनुदात्तादेरञ् भवतीत्यस्याव
काशः जारद्धृक्षः जारद्धृक्षं प्राणिरञः स एव दृढो मयं प्राप्नोति कपोतः कापोतं प्राणिरञ् भवति विप्रतिषेधेन कः पुनरत्र विशेषः
तेन वा सति अनेन वा सापवादकः स विधिः अयं पुनर्निरपवादकः यदि तेन स्यादिह न स्यात् म्वा विधौ विकारः शैवाविधं फले लुक् फले
लुग्वचनानर्थक्यं प्रकृत्यन्तरत्वात् फले लुग्वचनमनर्थकं किं कारणं प्रकृत्यन्तरत्वात् प्रकृत्यन्तरमामलकशब्दः फलेवर्त्तते ॥ ॥

मानत्वात् अयमिति अनेन परत्वान्मयटो बाधनात् म्वाविधय इति म्वानं विष्मनीतिन्क्विपनहिवृतीति दीर्घः कृत्स्वरेणोत्तरपदस्यान्तोदात्तत्वा
दनुदात्तादित्वात् अत्र मयड्भावात् प्राणिरञ् भवतीति द्वारादीनां चेति वृद्धिप्रतिषेध एजागमश्च फले प्रकृत्यन्तरत्वादिति आमलकादिशब्दः फले न यौगिकः
आमलक्याः फलमिति किन्तु हि जातिशब्द एवेत्यर्थः ॥ ॥ ॥

एकांतरदर्शनादिति आमलक्या अवयवे आमलकं दृश्यते तत्र यौगिक एव फले आमलकशब्द इत्यर्थः फलैकांतर इति फलमेकं अंतरमस्येति बहुव्रीहिः यदि संबंधदर्शनाद्यौगिकत्वमामलकशब्दस्य फले यद्यवयवे प्रयुज्यते तदा संबंधाविशेषादामलकशब्दो यमामलकी वृक्ष इति वृक्षावयविनि प्रसज्यमुत्पाद्यत्वं विशेषः तस्मादुभयत्रा प्यामलकादयो जातिशब्दा एव समभावतो वर्तन्त इति अभ्युपगंतव्यमित्यर्थः लुब्लुक् फलपाकशुषामिति फलपाकेन ये शुष्यंति व्रीह्यादयः तद्वाचिनामित्य

एकांतरदर्शनात्सिद्धमिति एकांतरदर्शनात्प्रसंग इति चेत् वृक्षे लुग्वचनं एकांतरदर्शनात्प्रसंग इति चेत् वृक्षे लुग्वक्तव्यः वृक्षोपि हि फलैकां तः लुब्लुक् प्रकरणे फलपाकशुषामुपसंख्यानं लुप्प्रकरणे फलपाकशुषामुपसंख्यानं कर्तव्यं व्रीहयः यवाः माषाः मुद्गाः ति लाः पुष्पमूलेषु बहुलं पुष्पमूलेषु बहुलं लुब्वक्तव्यः मल्लिका० करवीरं० बिसं० मृणालं न च भवति पाटलानि मूलानि॥ ॥

इति महाभाष्ये चतुर्थाध्यायस्य तृतीये पादे द्वितीयमाह्निकं प्राग्वहतेष्ठक् ठक्प्रकरणे तदाहेति माशब्दादिभ्य उपसंख्यानं ठक्प्र करणे तदाहेति माशब्दादिभ्य उपसंख्यानं कर्तव्यं माशब्दिकः नैत्यशब्दिकः कार्यशब्दिकः आहो प्रभूतादिभ्यः आहो प्रभूता

=नविति तथा च वाक्यस्य द्वितीयांतता आत्मनेपि प्रत्यय इति भावः॥३२ ×पादस्य समाप्तः।× ‘दिभ्यः ठग्वक्तव्यः॥ ॥ ॥

र्थः व्रीहय इति बिल्वादयः यवा माषा इति॥ तण्धान्यानां च द्व्यषामिता घुटानत्वात् अणोऽस्य गोकोराण मुद्गशब्दात् बिल्वादयण् पाटलानीति पाटलिशब्दो वि ल्वादिः उपाध्याय जय्यट पुत्र कय्यट कृते भाष्यप्रदीपे चतुर्थस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकं॥ प्राग्वहतेष्ठक् तदाहेति तदिति कर्ममात्रं निर्दिश्यते न तु द्वितीयासमर्थविभक्तिः आहो प्रभूतादिभ्य इत्यतो मेदे न वचनान्तेन पदसमुदायाः प्रत्ययः माशब्द इत्याह माशब्दिको नित्यः शब्द इत्याह नैत्यशब्दिक ‘इति तत्र पदसमुदायार्थ इति नाप्रसबन्धस्यमानो वचनक्रियासंबंधात् कर्मसंपद्यते अमाति पदिकत्वात् द्वितीयानुत्पत्तिः॥

=प्रच्छनाविति निर्देशकुत्सायामस्वार्थनिर्देशो इतिप्र एवमादाविति कृप्रच्छोप्रकार्यं तरमप्याह निर्देशेनेति ॥ १ = कुसीदसूत्रे कश्चित् विधानाद्वस्माकमतमाह विधी ति ॥ २ =

भा० कै० ४
११०

प्रभूतमाहेति क्रियाविशेषणत्वात्कर्म्मत्वं प्रच्छनाविति निर्देशतानुकरणमेतन्नशब्दे कार्यासंभवात्ति देशार्थेठगिविधिः आक इहेति एकस्यवानेकस्य वाप्रकारस्यजनपदस्य श्रुत्याविशेषानवधारणात् सां हितिकेपि बाधकारे नचिन्त्ये ति द्विर्वचनविधानादनेकप्रकारत्वसंभवात् संशयः आकर्षेति स्तो कवान्निकुकारः संदिग्धान संदिग्धोऽश्रुधातितिरासायपर्य्यजीगणत् पठेत इति विधिवाक्यापेक्षं षष्ठ्यन्तं प्रत्ययास्तु सप्तमे ते विभाषा वीवधाच्चेति वक्त

प्रभूतमाह प्राभृतिकः पार्याप्निकः पृच्छतौ सुस्नातादिभ्यः पृच्छतौ सुस्नातादिभ्यष्ठगवक्तव्यः सौस्नातिकः सौखरात्रिकः सौखशायनि कः गच्छतौ परदारादिभ्यः गच्छतौ परदारादिभ्यष्ठगवक्तव्यः पारदारिकः गौरुतल्पिकः आकर्षात्ष्ठल् इहकेषांचित्सांहितिकं षत्वं के षांचित् षिद्रर्थम् तत्र नतापनेकेषांसांहितिकं षत्वं केषां षिदर्थमिति तत्र किंन्याय्यं परिगणनं कर्त्तव्यं आकर्षात्पर्पादेर्भस्त्रादिभ्यः कुसीदसूत्राच्च आवसथात्किसरादेः षितः षडेते ठगधिकारे। विभाषा विवधात् वीवधाच्चेति वक्तव्यं वीवधिकः त्रैमेयम् नित्यं निरस्य ग्रहणं किमर्थम् विभाषामामाभूत्॥ ॥ =अस्यकुटिलिकायाश्च सूत्र २ = ॥७॥

यमिति अत्र विवधवीवधशब्दौ पर्यायौ। तत्र अविरविकन्यायो न संभवति उभाभ्यां प्रत्ययस्येष्टत्वात् ततो वीवधाच्चेति वक्तव्यमित्युक्तं त्रैमेयं विभाषामामा भूदिति द्वेधा अत्र विभाषे संभवतः एकामहाविभाषा अपराविभाषा विवधादिति तत्रान्तरेणापि नित्यग्रहणं पूर्व्वसूत्र एवानन्तरस्य विभाषाग्रहणस्या स्वरितत्वादनुवृत्तत्वान्महाविभाषानित्यग्रहणेन निवर्त्यते। इतरेणान्तराविभाषानिवर्त्तते इत्युक्तमिति मलाह॥ ॥ ॥

=ननु रात्रिंमन्यइति प्रयोगद्वयएवैतत आह॥ प्रेक्ति॥ रात्रिंमन्यइति वत्सन्रतीकत्रिरित्यादि प्रयुज्येत इति भावः॥ २=ननु कुटनं कुटस्तेन न निर्ह्रत्ता कुटिमेत्यर्थः शब्देनोपपद्यते प्रसव्यस्य लावेविधानात्॥ अत आह॥ भावेति॥ २=

नैतदस्तीति इतरः स्वाभिप्रायं प्रकाशयति इदंतर्हीति निर्वृत्तएवेति पङ्क्त्रिणा निर्वृत्तमित्यस्यैववाक्यस्य निवृत्तिः स्यान्नतु पङ्क्तिः क्रियत इत्यादेरपीत्यर्थः रात्रिंमन्य

हीति अन्यस्य प्रयोगमंतरेणापि महत्वादौ निष्ठत्रिण ह्यर्थे विशेषणा निष्ठुरित्यर्थः भाव इति प्रकृत्येति भाववाचिनः प्रातिपदिकान्निर्वृत्तेर्थे इमप्प्रविधेय इत्यर्थः त्रे

रिति पूर्वेणसिद्धे नियमार्थं वचनं। तेन न निर्वृत्ते नतावद्वाक्यं निवर्त्तते। ततो नियमस्य नेनोपचारां तर विषयस्यापि वाक्यस्य निवृत्तिः क्रियत इति तद्विषयता त्रिमस्य

नैतदस्ति प्रयोजनं एतस्मिन्नेव योगे विभाषा ग्रहणं निवृत्तं इदं तर्हि प्रयोजनं त्रेर्मब्वचनं नियमविषयार्थं नियमं तमब्विषयमेव यथा स्यात्

केवलस्य प्रयोगो माभूत् अस्ति प्रयोजनमेतत् किंतर्हीति॰ तत्र यथाधिकारं तद्विषयता प्रसंगः तत्र यथाधिकारं तद्विषयता मा प्राप्नोति॰ निर्वृ

त्त इति वर्त्तते तेन निर्वृत्तएव अन्तमब्विषयं स्यात्। येऽन्ये उपचारास्तत्र न स्यात्॰ रात्रिंमन्यस्त्विति तमिति एवं तर्हि भाव इति प्रकृत्स इमप्प्र

त्ययः कुट्टिमाभूमिः सेकिमोऽसिरित्येवमर्थं ततो वक्तव्यं त्रेः त्रेस्त्वेम प्रभवति॰ ततो नियमं॰ नियमं तारिमबिति॰ किमर्थमिदं। नियमं

तमिमब्विषयं एव यथा स्यात् केवलस्य प्रयोगो माभूदिति त्रेर्मब्नित्यं चूर्णादिभिः अयं योगः शक्यो वक्तुं॰ कथं चूर्णी चूर्णिनो चूर्णिन

इति इनिनैतन्मत्वर्थीयेन सिद्धं॰ चूर्णादिभिः लवणाल्लुक् लवणाल्लवचनानर्थकं रसवाचित्वात्॰ लवणाल्लुग्वचनमनर्थकं। किं कारणं॰

रसवाचित्वात् रसवाच्येष लवणशब्दः नैष संसृष्टनिमित्तः आतश्च रसवाची॰ असंसृष्टेऽपि दर्शनात्॰ असंसृष्टेऽपि हि लवणशब्दो वर्त्तते॰ नद्य

स्मिन्निति चूर्ण इनिनेति ठक्संसृष्टइत्यनेनाभिधानान्नभविष्यतीति भावः लव रसवाचित्वादिति रसस्य गुणत्वात् गुणवाचिनो मुक्तादीनां गुणगुणि

नोरभेदोपचारात् गुणिवृत्तिदर्शनान्नार्थो लुकेत्यर्थः असंसृष्टेचेति लवणेन द्रव्येण यदसंसृष्टं लवणरसयुक्तं तत्रापि लवणशब्दस्य दर्शनात् गुणशब्दत्व

मेवास्येत्यर्थः॥ ॥

संसृष्टे चेति लवणाद्द्रव्यसंसृष्टमपि यत्तल्लवणरसं न भवति० तत्र न दृश्यते लवणशब्द इत्यर्थः प्रत्ययः अयुक्त इति उत्तमर्णो यदृत्वं दृश्यति नृत्तरगर्ह्ये य
सेत्स्यं दत्वा वृद्धिं गृह्णातीति तद्वेगर्ह्यमित्यर्थः गर्ह्यायेति [illegible] द्विगुणं प्रयच्छतीति द्वैगुणिक इति चतुर्थ्यन्तात्प्रत्ययो विधेय इत्यर्थः मेस्याल्लोपो वेति उपचा
रोपेक्षया विकल्पार्थो वा शब्दः द्विगुणं मेस्यादिति वाक्यात्प्रत्ययो मेस्यात् लोपश्च वार्द्धुषिक इति वृद्ध्यर्थं धनं प्रयच्छतीत्यर्थः धर्मं अधर्माच्चेति नदंतवि

संसृष्टे चादर्शनात्० संसृष्टे पि च यदा नोपलभ्यते तदाह अलवणः सूपः अलवणं शाकमिति० लवणाल्लुक् प्रयच्छतीति गर्ह्यं० अयुक्तो
यं निर्देशः यदस्मा[illegible]द्वृत्स्यं दत्वा वृद्धिं गृह्णातीति तदर्थं० कथं तर्हि निर्देशः कर्त्तव्यः प्रयच्छति गर्ह्यायेति० स तर्हि तथा निर्देशः कर्त्तव्यः न कर्त्तव्यः
तादर्थ्यात्ताच्छब्द्यं भविष्यति० गर्ह्यार्थं गर्ह्यं० मेस्याल्लोपो वा० मेस्याच्छब्दल्लोपो वा वक्तव्यः द्विगुणं मेस्यादिति प्रयच्छति द्वैगुणिकः त्रैगुणि
कः वृद्धेर्वृधुषिभावः वृद्धेर्वृधुषिभावो वक्तव्यः वार्द्धुषिकः धर्मं चरति अधर्माच्च० अधर्माच्चेति वक्तव्यं आधर्मिकः ऋतोऽञ् नञ्
राभ्यामञ्वचनं नरनराभ्यामञ् चेति वक्तव्यं नुर्धर्म्यो नारी नरस्यापि नारी विशसितुरिड्लोपश्च अञ् च वक्तव्यः विशसितुर्धर्म्यं वै
शस्त्रं० विभाजयितुर्णिलोपश्च० अञ् च वक्तव्यः विभाजयितुर्धर्म्यं वैभाजित्रं शिल्पं किंपस्य मर्दंगाः शिल्पं सप्तादि गीकः किं चातः कुं

भकारे प्राप्नोति० ॥ ॥ ॥

धेर्ग्रहणावता प्राप्तिपरिकेन निषेधाद्वचनं। येन विधिरिस्तदन्तधर्म्या न्नन्म इति वार्त्तिकमनपेक्ष्यैतदुक्तं ऋतोऽञ् नञ् नराभ्यामिति० न शाखस्यास्त्रेणैव सिद्धे
प्रत्यये दृष्टान्तत्वेनोपादानं। यथा नरशाद्गादञ् भवत्येवं नरशाद्गादपीत्यर्थः शिल्पम् अभ्यासपूर्वकं क्रियासु कौशलं शिल्पं मर्दंगादिषु बुद्धिविधा क्रियाभ्य
भ्याहननलक्षणा निष्पादनलक्षणा च तत्र विशेषानुपादानात्पृच्छति किंयस्येति॥ ॥ ॥ ॥

एवं तर्हीति उपचरितवृत्तिः शिल्पशब्दः आश्रीयत इत्यस्य एवं वा शब्दः लोपः कुंभकारस्य हि मृदंगो मुख्यं शिल्पं। वादकस्य तूपचरितं मृदंगवादनमिति लोके मार्दंगिक
शब्दस्य मृदंगवादनशिल्पो ऽभिधेयः तत्र साहचर्यात् मृदंगवादनेन मृदंगशब्दस्य वृत्तिविषये इह सागतार्थत्वात् प्रयोगो वादनशब्दस्य। शक्ति। ईकारांत इति बह्वा
दिपाठात् प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणमिति वचनात् शाक्तीकशब्दात् ठक् भविष्यतीत्यर्थः इकारोच्चारणसामर्थ्यादिति अन्ये त्वाक

एवं तर्हि ठक् तत्र परलोपो वक्तव्यः। शिल्पमिव शिल्पं। मृदंगवादनं शिल्पमस्य मार्दंगिकः मौरजिकः। पाणविकः पैठरिकः। शक्तियष्ट्योरीकक्।
किमर्थमीकगुच्यते न ठगेवोच्येत। का रूपसिद्धिः शाक्तीको याष्टीक इति। शक्तियष्ट्योरीकारान्ते कपा ह्रस्वप्रसंगः। न सिध्यति। विभाषा चे
वृद्धिः शक्तियष्ट्योरीकारः अपि च केण इति ह्रस्वत्वं प्रसज्येत। एवं तर्हि इकगुच्यते। का रूपसिद्धिः शाक्तीको याष्टीक इति सवर्णदीर्घत्वेन
सिद्धं न सिध्यति यस्येति लोपः प्राप्नोति इकारोच्चारणसामर्थ्यान्न भविष्यति यदि तर्हि प्राप्नुवन्विधिरुच्चारणसामर्थ्याद्बाध्यते स
वर्णदीर्घत्वमपि न प्राप्नोति यं विधिं प्रत्युपदेशो ऽनर्थकस्स विधिर्बाध्यते। यस्य तु विधेर्निमित्तमेव नासौ बाध्यते यस्येति लोपं च प्रति
इकारोच्चारणमनर्थकं सवर्णदीर्घस्य तु निमित्तमेव॥ ॥

कमेव विदध्यात् न चावयवग्रहनिवृत्तिरिकारस्य प्रयोजनं यतो न लक्षणेन पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्त्यं यं विधिमिति एवं च दीर्घोच्चारणं प्रसा
रव्यान्तं इकासिद्धत्वात् अन्ये त्वाहुः शक्तियष्ट्योरीकगिति ठग्विधानादेव यस्येति लोपाभावं सिद्धः प्रहणमिसनेन हि ठकि सिद्धे पुनष्ठग्विधानं यस्येति लोपाभा
वार्थमेव वाक्यानिवृत्तये निसार्थं तस्मादिति चेत्तन्न शक्तियष्टिभ्यामिसे वाधिकस्स ठकः पूर्वेण सिद्धस्य पुनर्विधानेन वाक्यनिवृत्तेरपि सिद्धत्वात्॥ ।

=एवं च ठगेव वक्तव्य उक्त इति भावः। ७=

=आस्तिकशब्दस्य॰२=

भा०कै०४ ११२

अस्ति चौरेऽपीति तस्यापि मतिसद्भावात् अचेतनस्य घटादेर्नास्तिकः स्यादिति वक्तव्यं न्यायस्य तु प्रदर्शनात् भाष्यकारेण मतिपदं नोक्तं अस्तीत्यस्येति प
रलोककर्तृका च सत्ता विज्ञेया । तत्रैव विषये लोके प्रयोगदर्शनात् । नात्र च परलोकोऽस्तीति मतिर्यस्य स आस्तिकः तद्विपरीतो नास्तिकः दिष्टशब्दो दैवपर्यायः तेन
दैवप्रमाणको दैष्टिकः छत्त्रा राजपुरुष इति यः पुरुषो राज्ञश्छत्त्रं धारयति स छात्त्रशब्दाभिधेयः स्यादित्यर्थः उत्तरपदलोप इति उत्तरपदस्यैव शब्द

अस्ति नास्ति दिष्टं मतिः किं यस्यास्ति मतिः स आस्तिकः किं चातः चौरेऽपि प्राप्नोति एवं तर्हि इतिलोपोऽत्र द्रष्टव्यः अस्तीत्यस्य मतिः
आस्तिकः । नास्तीत्यस्य मतिः नास्तिकः । दिष्टमित्यस्य मतिः दैष्टिकः छत्त्रादिभ्यो णः किं यस्य छत्त्रधारणं शीलं स छात्त्रः किं चातः
राजपुरुषे प्राप्नोति एवं तर्ह्युत्तरपदलोपोऽत्र द्रष्टव्यः छत्त्रमिव छत्त्रं गुरुः छत्त्रं गुरुणा शिष्यः छत्त्रवच्छाद्यः शिष्येण च गुरुः छत्त्र
वत्परिपाल्यः हितं भक्षाः हितं भक्षा इति चतुर्थीनिर्देशः हितं भक्षा इति चतुर्थीनिर्देशः कर्तव्यः इतरथा ह्यस्य निर्देशः इतरथा
हि निर्देशो न भवति हि शब्देन च योगे चतुर्थी विधीयते सा न प्राप्नोति स तर्हि चतुर्थीनिर्देशः कर्तव्यः न कर्तव्यः एवं वक्ष्या
मि हितं भक्षास्तस्मै॰ ततो दीयते नियुक्तं॰ तदस्मा इति॰ ॥ ॥

स्य लोपो द्रष्टव्य इत्यर्थः गौणी वृत्तिश्छत्त्रशब्दस्याश्रयणीया तत्रैव प्रसिद्धदर्शनादित्युक्तं भवति गुरुश्छत्त्रमिति अज्ञानं शिष्यस्य छादयति निव
र्तयति यतस्ततश्छत्त्रं शीलमस्य गुरुविषयं पालनं शील[illegible]मस्येत्यर्थः हितं इतरथा हीति यदि हि चतुर्थी न निर्दिश्यते तत्सामर्थ्यात्तायाः अस्येति षष्ठ्याः
सम्बन्धायोग्यत्वादिह तु पञ्चस्थानात्प्रसेयार्थो न निर्दिष्टः स्यादित्यर्थः ॥ ॥ ॥

राम० ११२

=हितयोगे चतुर्थी विधानात्॰१=

=अज्ञानमिति॰ यथा छत्त्रमुष्णादि निवर्तयति एवमज्ञानं गुरुर्निवर्तयतीति छत्त्रसधर्मत्वाद्गुरुः छत्त्रं॰ [illegible] त्रमिव गुरुः परिपाल्य इति॰ मुख्यार्थान्वयप्रत्ययो नानभिधानादित्याहुः ॥२=

=परिशाणने प्रयोगदर्शनस्यैवक्तव्यत्वात् ॥२=

तद्वहं शाकृभेदादिति षष्ठ्यन्तात् प्रत्ययो विधीयमानो द्वितीयान्तान्न प्राप्नोतीत्यर्थः ॥ अर्थसामान्यादिति ॥ अर्थस्यैकत्वात् षष्ठ्यन्तादेव प्रत्ययोत्पत्तावपि सिद्धि
र्भवत्येवेत्यर्थः ॥ ननु रथाद्यां ग इति तत्रोक्तं वोढर्यपि प्रयोगदर्शनादिष्यता मित्यस्योपुः ॥ द्विरथ्य इति ॥ रथसीताहलेभ्यो यद्विधाविति तदन्तविधिः संज्ञायां ।

तद्वहति रथयुगप्रासंगं वहसमिधाने रथशाकटहलसीरेभ्यः प्रत्ययविधानार्थकं विहितत्वात् वहतीत्यभिधाने रथशाकटहलसी
रेभ्यः प्रत्ययविधानमनर्थकं किं कारणं विहितत्वात् विहितो ऽत्र प्रत्ययः तस्येदमिति शाकृभेदादविधानं ॥ शाकृभेदादविधिः संभवति अन्यो हि
शकटेरथं वहति । अन्यो हि शकटेरथस्य वोढेति शाकृभेदादविधानमिति चेदर्थाश्रयत्वात्प्रत्ययविधानस्यार्थसामान्यात्सिद्धं शाकृभेदाद
विधानमिति चेत् अर्थाश्रयः प्रत्ययविधिः य एव ह्यर्थो रथं वहति स एव रथस्य वोढेति तत्रार्थसामान्यात्सिद्धं इदं तर्हि प्रयोजनं यो
द्वौ रथौ वहति स द्विरथ्यः यो द्वयो रथयो र्वोढा स द्विरथः तेन सति लुग्भवति अनेन सति कस्मान्न भवति प्राग्दीव्यत इत्युच्यते संज्ञा
यां जन्याः किं निपात्यते जनेर्जन्या जनी भावो निपात्यते यञ्च प्रत्ययः जन्या इति निपातनात् नर्थकं पंचमीनिर्देशात् जन्या इति निपा

=जन्या इति योग्यतावशात्... =

९ तनमनर्थकं किं कारणं पंचमीनिर्देशात् जनीशब्दादेषा पंचमी इदं तर्हि प्रयोजनं ॥

निपातनानर्थक्यमिति हृतिकारे यन्निपातनमाश्रितं तत्तदनर्थकं विधिनैव सिद्धिर्भवत्येवेत्यर्थः जनीशब्दादिति जायतेऽस्यां गर्भ इति जनी वधूरुच्यते
जनिसहिभ्यामितीण् प्रत्ययो जनिवध्योश्चेति वृद्धिप्रतिषेधः ॥ श्री ॥७॥ ॥७॥

=तद्वहतीत्यनेन सिद्धे विधानं सामर्थ्यार्थविशेषज्ञापनार्थं ... =

भा० कै० ४
११३

सर्वकाल इति। यद्यपि विध्यर्थत्वेपि संख्याकालयोरविवक्षितत्वात् सिद्धयति तथापि न्यायानुसरणेप्रतिपत्तिगौरवं स्यादिति निपातनाश्रयणं विध्य साकं राणि भिरिति प्रधानस्यात्रसापेक्षत्वाद्वृत्तिप्रसंगः अनभिधानादिति शार्ङ्गैरभिंपद्य इति प्रयोगाभावादित्यर्थः एवं चाधनुषेत्सपि न वक्तव्यं अन्येत्वाहुः धनु

=करणयोगेनभवतीत्यर्थः।२= =बुद्धिरूपं।१=

सर्वकालः प्रत्ययविधिर्यथा विज्ञायेत जनीं वहंति जन्याः जनीं वोढारो जन्याः जनीमवाप्स्यन्ते जन्या इति विध्य सधनुषा विध्यस करणेन विध्यस करणेनेति वक्तव्यं इतरथा ह्यतिप्रसंगः अधनुषेति ह्युच्यमाने अतिप्रसंगो भवति इहापि प्रसज्येत शार्ङ्गैरभि विध्यति। कंटकैर्विध्यति तत्र हि वक्तव्यं न वक्तव्यं कस्मान्न भवति। शार्ङ्गैरभिर्विध्यति कंटकैर्विध्यतीति। अनभिधानात् ग हपतिना संयुक्ते ञ्यः। गृहपति ना संयुक्त इत्युच्यते। [illegible] तत्र दक्षिणाग्नावपि प्राप्नोति। दक्षि णाग्निरपि गृहपतिना संयुज्यते। एवं तर्हि गृहपतिना संयुक्त इत्युच्यते। सर्वं च गृहपतिना संयुक्तः तत्र प्रकर्षगतिर्विज्ञायते। सा धीयो योगृहपतिना संयुक्त इति। कश्च साधीयः यस्मिन्पत्नी संयाजाः क्रियंते अथवा गृहपति नाम मंत्रः यस्मिन्नुच्यते अथवा

“ संज्ञायामितिवर्तते [illegible] ॥ श्री ॥ ॥

षाकारणविशेषेणाकारणमात्रं लक्ष्यत इति सर्वत्र प्रकरणे प्रतिषेधः प्रवर्तते। गृह गृहपतिर्यजमानः यस्मिन्निति यजमानेन पत्न्या च येयागविशे षाः क्रियंते ते पत्नी संयाजाः ते च गार्हपत्य एव क्रियंते न दक्षिणाग्नौ अथवेति स च मंत्रो गार्हपत्य विषय एव॥ श्री ॥

एम०
११३

मत्वर्थे अनंतरार्थे वेति वा शब्दः समुच्चये। मत्वर्थे मासतन्वोः विशेषणोऽपि मत्वर्थोऽनंतरार्थे पीत्यर्थः मधुरिति मधु विद्यतेऽस्मिन् मासि विद्यतेऽस्मिंस्तयो विद्यतेऽस्मिन्निति यतो लुक् नभः शब्दो ज्याधवाची अत्र नभस्तप इति नपुंसकत्वं छांदसत्वात् इषइति एवमादिषु सास्मिन्नस्ति दुर्गास्मिन्नस्ति शोच

=मधोर्ञ्वेति प्रत्ययः। तत्र मत्वर्थे मासतन्वो रित्यनुवृत्तेः।१=

मत्वर्थे मासतन्वोः मासतन्वोरनंतरार्थे वा मासतन्वोरनंतरार्थे वेति वक्तव्यं मधवस्मिन्नस्ति॰ मधवस्मिन्ननंतरमिति वा मधवः माधवः लुगकारेकाररेफाश्च लुगकारेकाररेफाश्च प्रत्यया वक्तव्याः लुक् मधुं नभः तपः। अकारः। इषः उर्ज्जः। इकारः शुचिः। रेफः शुक्रः॰ शु क्रः। वसोः समूहे च अक्षरसमूहे छंदस उपसंख्यानं अक्षरसमूहे छंदस उपसंख्यानं कर्तव्यं ओश्रावयेति चतुरक्षरं अस्तु श्रौषडि ति चतुरक्षरं येयजामह इति पंचाक्षरं यजेति द्व्यक्षरं द्व्यक्षरो वषट्कारः एष वै सप्तदशाक्षरः छंदस्यः प्रजापतिर्यज्ञमनुविहितः छं दसि बहुभिर्वसव्यैः उपसंख्यानं कर्तव्यं हस्तौ पृणस्व बहुभिर्वसव्यैः अग्निरीशे वसव्यस्य उपसंख्यानं कर्तव्यं तन्न स्योपसंख्यानं कर्तव्यं न कर्तव्यं स्वार्थविज्ञानात् सिद्धं स्वार्थविज्ञानात् सिद्धमेतत् वसव एव वसव्याः पांतु॥ ॥ इति श्री भगवत्पतंजलिविरचिते व्याकरणमहा

१ भाष्ये चतुर्थस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकं॥ पादोऽध्यायश्च समाप्तः॥ ॥

नं शुक् सास्मिन्नस्तीति प्रत्ययाः शुक्र इत्यत्रापत्ययादित्वाज्जत्वाभावः वसोः अक्षरसमूह इति अक्षरसमूहवाचिनः छंदः शब्दाद्यत्प्रत्ययः ओश्रावयेति अक्षराणि गण्यंते स्वार्थविज्ञानादिति वसोरिति योगविभागः कर्तव्यः तेन स्वार्थे भविष्यतीत्यर्थः॥ ॥ इत्युपाध्यायजय्यटपुत्रकैयटकृते भाष्य

१ प्रदीपे चतुर्थस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकम्॥ ॥ ॥७॥

=स्वार्थेप्रत्ययइतिभावः।२=



